काव्यप्रकाशस्य

उदाहरणचंद्रिकाख्याव्याख्या

~~२९८~~

२४१

४१ पत्रावली

१५

उदाहरणचंद्रका

उ॰र॰वृ॰
१

श्रीगणेशायनमः निजभक्तधुरीणस्यगिरंकर्त्तुंगरीयसीम् स्तंभादाविःकृताकारंनमामिकुलदैवतम् १ गंगोत्तंसितमौलिश्चं
द्रकलालालितशेखरःसततं अंगीकृतगलगरलोजयतिजयंतीपतिर्जगति २ यत्पदांबुरुहद्वंद्वमिलिंदीकृतमानसाः भक्ताभ
वंतिसिद्धीनांसदनंतामुमांभजे ३ उत्तुंगकुंभयुगसांद्रविलिप्तचारुसिंदूरपूररुचिरायगजाननायदूरान्नताखिलसुपर्वकिरीट
रत्ननीराजितांघ्रियुगलायसदानतोस्मि ४ आधायहृदिवाग्देवीचरणांबुजमादरात् कुर्वेप्रकाशसंबद्धामुदाहरणचंद्रिकाम् ५ वि
रंतनकृतव्याख्याःसमालोच्ययथामति रचितावैद्यनाथेनरामचंद्रात्मजन्मना ६ कृतिरेषाकृपावद्भिःसाधुभिर्ध्वनिपंडितैः
गुणदोषविभागज्ञैर्निपुणंपरिशोध्यताम् ७ स्वाधीनपतिकाकाचिदसकृदुपभुक्तेष्वपिवरोपकरणादिषूत्कंठोत्सुकातेषामसंतोषया
देयतांसखंयंतींसखीमाह यःकौमारेति अत्रहिशब्दस्यपादपूरणार्थकतयाअस्तिक्रियाध्याहारेणचयःकौमारहरोवरःसएवयद्यप्यस्ति
चैत्रक्षपास्ताएवयद्यपिसंतिउन्मीलितमालतीसुरभयःप्रौढाःकदंबानिलास्तेचयद्यपिसंतिअस्मिचसैवयद्यप्यस्मितथापितत्ररेवारोध
सितरुवेतसीतरुतलेतत्सुरतव्यापारलीलाविधौचेतःसमुत्कंठतइत्यन्वयःकौमारंबाल्यंपरमरसिकतयातदवस्थायामपिसंभोगेच्छोत्सा

रम॰
१

दनेन स्तनवान्चोरितवानितिकौमारहरः ततश्चाकृत्रिमप्रेमयात्रताप्रकटनेनानुरागदार्ढ्यध्वननं॰ प्रियनेप्रियत्वेनस्वयमंगीक्रियत
इतिवरः तेनोभयानुरागलाभः कौमारं नवयौवनमितिव्याख्यानेतुस्वयमालोच्य इतोनतुपित्रादियारनेन्यालक्षचिदाश्रितइसर्थः
निषिद्धलक्षणापत्त्यानुतथाव्याख्यानं न मनोरमं॰ सएव॰ उपभुक्तामोनेसर्थः हिशब्दो॰ योगव्यवच्छेदार्थइसमे॰ तदाचयपीम
ध्याहार्यं॰ चैत्रस्यस्यारात्रयः ताएवेतिपूर्ववत्॰ उन्मीलिताविकसितायामालतीतयासुरभयः शोभनगंधाः मालतीचवासंतील
तानतुजातिः चैत्रेतस्याःसंभवात्॰ प्रौढाः रसुद्दीपनादिप्रागल्भ्यशालिनः॰ अतोमंदत्वेप्यविरोधः॰ कदंबस्यधूलीकदंबाख्यस्य
पुष्पविशेषस्यसंबंधिनः सर्वदिक्संचारित्वेनकदंबकाराबाअनिलावायवः॰ वसंतेकदंबांतरस्यासंभवात्॰ वसंतेसकलकुसुम
वर्णनस्यकविसंप्रदायसिद्धत्वादविरोधइतिकश्चित्॰ वसंतघनसमययोर्द्वयोरप्यृतुराजयोर्ग्रहणमितिनुसंप्रदायइतिचंडी
दासः॰ यत्तुदर्शितविरोधेसमाधिमपश्यतांचैत्रेसत्रभाद्रेतिपाठकल्पनंतदुष्करीत्यागतिसंभवादन्याय्यमेव॰ यत्तुतत्रदोषोम्दाव
नंबर्षर्त्तौनदीतीरनिकुंजेसुरतावर्णनादिति॰ तदयुक्तं॰ कच्छनिकुंजेतदनौचित्येपिचौरनिकुंजेअनौचित्याभावात्॰ मेघैर्मेदुरमिसादौ

दृष्टत्वादितिदीपिकाकारः॰ चोऽवधारणे॰ तएवेत्यर्थः॰ अत्रचप्रौढाइतिश्लिष्टविशेषणबलान्मालत्यनिलयोर्नायकनायिकात्वम
तीतिः॥ चकारोऽप्यर्थोभिन्नक्रमः अस्मीत्यहमर्थकमव्ययं॰ अन्यथासैवेत्यस्योद्देश्यालाभात्॰ सैवेत्यस्योत्कंठाहेतुत्वस्यानरनं
प्राप्तेरित्यर्थः॰ तथापि॰ एतेषामसकृदुपभोगेपि॰ तत्रेत्युपभुक्तेरित्यर्थकं सप्तम्यंतत्रयेप्यन्वेति॰ तेनसुरतलीलाविधिरपिनात्यादृशो
येनक्रीडास्थानेस्मिन्नुत्कंठास्यादितिव्यज्यते॰ रेवायानर्मदायारोधसि॰ तीरे॰ वेतसीवेतसलता॰ विशालत्वतयालतांतराश्रयत्वेनचसेव
तरुस्तद्रूपितोवा॰ मस्तरुस्तस्यतलमधोदेशस्तस्मिन्सुरतानुकूलव्यापाररूपायालीलाकुसुमाभरणादिप्रसाधनादिरूपास्मिन्नाश्ले
षचुंबनादिरूपावातस्याविधौसंपादनेचेतोंःतकरणंसमुत्कंठते॰ उत्सुकंभवतीत्यर्थः॰ अत्रचवरोपकरणादीनामनुपभुक्तत्वस्यप्रसिद्धस्य
कारणस्याभावेपितत्कार्यस्योत्कंठारूपस्योसन्निकथनरूपाविभावनाऽलंकारः॰ वरोपकरणादीनामसंतोयादेयन्वस्याप्रसिद्धस्य
कारणस्यविभावनात्॰ आत्मनःप्रकृतिविशेषोवृद्धकालव्यवधानंवास्युत्कंठयाविभावनीयमितिदीपिकातत्रप्रकृतिविशेषरस
युक्तं॰ साचैवास्मीत्यनेनपरिहृतत्वाद्व्यवधानस्यास्फुटत्वाच्चानुपभुक्तताभावत्वेनाकथनात्एवमुपभुक्तत्वरूपकारणसत्त्वेप्य

नुत्कंठारूपस्य कार्यस्याभावकथनाद्विशेषोक्तिरप्यनुत्कंठाभावत्वेनाकथनादस्फुटेत्यस्य पर्यायेति का त्वारहेतुश्चात्र विप्रलंभः स्वा
धीनपतिकाया अपि क्रीडास्थानागमनादिना सुरतप्रतिबंधेन संभवात्· सविसर्गगुरुहरेफानुप्रासो विप्रलंभीयमाधुर्यान
नुगुणत्वाद्चमत्कारित्वेनास्फुटः· एवं चैवं सपाः प्रोठा रसेतत्र ध्वनिगतत्वादुन्मीलितमालती सत्राप्यस्फुटतेति केचित्तु
·तत्रैव संख्यस्तानसमयानुभूतरसत्वं तथा वानुपभुक्ते रेवानीरस्मा संतोपादेयत्वमसूचिकोत्कंठे। वात्रा साधत इसाङ्कःय
त्रे· काचिद्वेत्रवतीरे परपुंमा कृतसंकेता तद्गृनिगोपयंती सखी माहेति तासर्यवर्णने· तदसंतायुक्तं· उक्तयुक्त्यावरोयकर
णादीनाम संतोपादेयत्वपरियोषितविप्रलंभास्वादनासर्यस्य स्वारसिकस्योल्लंघनेन तथा नासर्यकत्वेन प्रमाणाभावा
त्· विच्छिन्निविशेषाभावाच्चेति दिक् ॥ १ नायकानयनाय प्रेषितां तं संभुज्यागतां दूतीं प्रति विदग्धोत्तमनायिकास्थानकार्य
त्वप्रतिपादनमुखेन संभोगचिह्नान्युद्घाटयितुमाह निःशेषेति· अयि मिथ्यावादिनि बांधवजनस्याज्ञातपीडागमे इति इतो
वापीं स्नातुं गतासि न पुनस्तस्याधमस्यांतिकं· यतस्तव स्तनतटं निःशेषच्युतचंदनमित्याद्यन्वयः मिथ्यावादिनि मयागत्वाव

ऊधाग्रसाधितेपिनागतइतिमिथ्याभाषणशीले· वांधवजनस्यामद्रूपस्यज्ञातः स्वार्थपरायणतया ऽनाकलितः पीडायाश्चागमः आ
गमनंपयातयाविधेः हृतिनतुसश्चितेनमिथ्याभाषणशीलत्वस्यायोग्यताव्यज्यते· इतोममांतिकात्वापीप्रतिस्नानायगतासिस्ना
नकालानतिक्रमलोभात्नपुनरितिपुनरेवार्थे· नैवेत्यर्थः तस्य· वडूधाकृतापराधस्यअतएवाधमस्यपरवेदनानभिज्ञतयाऽः खप्र
योजककर्मशीलस्यः अंतिकंसमीपंगतासीत्यनुषंगः उक्तार्थेसाधकमाहनिः शेषेत्यादि· तवेत्यस्यस्तनतटावैरन्वयः· यतः तवस्त
नयोः तटंप्रांतसमदेशः नतुस्तनसंध्यादि· वापीगतवहलयुवजनत्रणा॥ निः शेषंच्युतंसर्वलिंपचंदनंयस्मात्तथाभूतं· ।पारवइपादं
तहृयलग्नायत्स्वस्तिकाकृतिभुजलतायुगलेनतटस्यैवोन्नततयामुद्रूःपरामर्शात्· अतएवच्युतमित्युक्तेनतुक्षालितमिति· युवज
नसंमर्देनतत्राप्यनवकाशात्· वांग्यपक्षेतुमर्दनाधिक्यात्तटमेवतथाभूतमितिवक्तमेव· एवमधरोनिर्मृष्टरागः निःशेषम
ष्टः रागोयस्यसतथा· उन्नानत्वेनवहलजलसंवंधात्नतुत्वरोष्ठः स्वभ्रतयातत्संबंधमोघात्· व्यंग्यपक्षेतुचुंवनहेततथात्व
मिति· किंचनेत्रेद्वयमुपरिभागएवअंजनरहिते· स्नानकालेमुद्गणात्नमध्येजलसंसर्गाभावात्· व्यंग्यपक्षेपिप्रांतएवचुंवनावि

धानादंजनलं· हूरंस्नसर्थमितिलसंभवदुक्तिकमेव·नेत्रमध्येचुंबननिषेधात्तथाऽयंतवतनुःतन्वीकृशाअतएवशीतवशात्सु
लक्षिता·प्रस्तकारोमोह्माःसंजाताभ्रान्त्याःसातथाभूता·व्यंग्यपक्षेसतुसुरतरससमरणात्सुलकोद्गमःचसंहर्षोरतत्वादिसेके
एवंविदग्धायागूढतासर्वथावाचोयुक्त्यासाधारणोक्षेतेषुवाक्यार्थेषुअनुगतेषुविदग्धोत्तमनापिकाल·दुःशीलत्वादिरूपवक्रबोद्धव्यवै
शिष्ट्यबलादधमपदार्थोदुःखप्रयोजककर्मशीलत्वरूपःसाधारणोवाच्यात्तादृशात्तादृशकर्मान्तरशीलत्वरूपेणावस्थितोव्यंजने
याहूतीसंभोगरूपतादृशाकर्मशीलत्वाकारेणपर्यवस्यति·अतएवस्फटितिव्यंग्यबोधकत्वादधमपदस्यप्राधान्यं·वक्तृबोद्धव्यादिवैशिष्ट्य
बलेनविशेषाकारेणपर्यवसानेविलंबाभावात·चंदनच्युतस्तनादीनांनुस्नानकार्यतयानिवहूतंयोग्यतयासंभोगगम्भूतास्येषचुंबनादिका
र्यतामतिसंधानेसतितंध्यंजनद्वारासंभोगगमकत्वमितिविशेषश्चात्रवक्तव्यम्एकतत्रायांयद्याधववुध्याविभ्यासिभियचेतत्रैवविधेदृष्टमनु
रक्तास्मितस्फक्तमेवममैवंविधाविविधवंचनाजनितपरितापपात्रमितीर्ष्याहेतुकविप्रलंभसंचारिनिर्वेदध्वनिःतदनुगुणाश्चदूतीसंभो
गःचंदनच्युतनादीनांचवाच्यानांव्यंग्यानांचपरिरंभचुंबनाद्यनुभावानांसंभोगोत्कर्षद्वारेणोष्णोत्तेजकानांनिर्वेदोत्कर्षकत्वमि

उच॰
४

ति॰ दीक्षितास्कन्ध अधमत्वमपकृष्टत्वं तच्च ज्ञासा कर्मणा वा भवति तत्र ज्ञासाग्यकर्षणोत्तमनायिकानायकस्य वक्ति॰ नापि स्वापर
धपर्यवसायि हूती संभोगादिहीनकर्मातिरिक्तेन कर्मणा॰ तादृशं च दूती संप्रेषणात् प्राचीनं सर्वं सोढमेवेति नो हूतानाहं
मितीतरस्या दूत्याः संभोगरूपमेव पर्यवसतीत्यधमपदस्याभिधानं॰ निःशेषेत्यादिवाक्यानि संभोगचिह्नोद्घाटनेन नस्य साहा
यकमावेदयन्ति॰ तथाहि॰ उत्तरीयाकर्षणेन चंदनच्युतिरित्यस्याः सिद्धिपरिहाराय निःशेषेति तत्र चंदनच्युतेः स्नानसाधारण्यव्या
वर्त्तनेन संभोगचिह्नोद्घाटनाय तटग्रहणं॰ स्नाने हि सर्वत्र चंदनच्युतिः स्यान्न तु स्तनयोस्तटे उपरिभाग एव दृश्यते॰ इयमाश्लेष
कृतैवेति॰ तथा तांबूलग्रहणविलंबात् प्राचीनरागस्य किंचिन्मृष्टतेत्यस्याः सिद्धिपरिहाराय निर्मृष्टेति रागस्य निःशेषमृष्टतो
क्ता॰ पुनः स्नानसाधारण्यव्यावर्त्तनेन संभोगचिह्नोद्घाटनायाधर इति॰ उत्तरोष्ठस्य गोणः॰ अधरमात्रस्य निर्मृष्टरागतांचुंबनकृतैवेति॰ एवं
मातर्दत्तमंजनं कालविलंबेन किंचिद्विलुप्तमित्यस्याः सिद्धिपरिहाराय दूरमित्युक्तं॰ दूरमस्य यद्यमिलापातपातो यः कालतः स्नानेन वा
सर्वतोंजनलोपः स्यात् तत्र नुल्लोचनयोः क्वचित्स्यात् एवानंजनलग्नमिदं चुंबनकृतमेवेति॰ पुलकिता तन्वीति वेयं तनुरित्यत्रापातनतस्य

राम॰
४

चीतिसहजनानववकीर्त्तनेनपुलकितेतिस्नानचिन्होपन्यासः पुलकिताधितन्वीवर्त्तेत इति त्वदिस्थितोन्वयः तेनचस्नानेनपुलकिताग
तुः किंचिदुल्लसितामवति· इयंतुननचेतिरतिक्लेशजनितावेवतानवपुलकोद्गमावितिममेोद्घाटनं· एवंमिथ्यावादिनीतिसंबोधन
मपिअंगयानुगुणएववनायकमानेतुंगच्छामीतिमिथ्याभाषणारूपेर्थेपर्यवस्यतीतिव्याचक्रुः॥ अत्रवदंति॥ यदिदंनिःशेषेत्याद
वांतरवाक्यार्थानांस्नानव्याहृत्तिहेतुरेण अंगयासाधारण्यसंपादनंतन्नव्यंजनानुकूलंव्याख्यपरपर्यायस्यासाधारण्यस्यानुमाना
नुकूलतयाव्यक्तिप्रतिकूलत्वात्· अतोस्मिन्दृष्टे बहुलेचिंतेस्यादेोसाधारणानामेवौचित्याद्यादीनांचचक्रादिवैशिष्ट्यवशादर्थविशेषव्यं
जकत्वस्वीकारात्· किंचैवंनिःशेषेत्यादिविशेषणवाक्यार्थानांवापीस्नानेबाधावनारात्तातुंगतासीसत्त्वविरोधिलक्षणायानगतासी
तिनिषेधस्य· तस्मात्किंनगतासीमत्रगतासीतिविधेरप्रतीत्यापत्तेःगतासीत्यशस्य व्यंग्यत्वानुपपत्तिः नचभवन्मतेपिनिःशेषेत्यादिवा
क्यार्थानांस्नानसाधारण्याद्याधानवतारोपितासत्यविषयतदंतिकगमनानयानुपपत्तिलक्षणेवेतिवाच्यं· विदग्धायाःस्नानकार्यत्वप्रकाश

उद्यव॰
२
[illegible]

नमुखेनैवनत्वकाशनेतासर्यात्। अयतदंशस्य लक्षणावेद्यत्वेपि रंतुमितिफलांशएव व्यंग्यत्वमितिचेन। अधमत्वमपकृष्टत्वं तच्चज्ञा
न्याक्रमेणावेद्यादिसंदर्भेणाधमत्वान्यथानुपपत्तिवेद्यनायाउक्तत्वान्‌ जनागम्यत्वेपि वाच्यानांनिःशेषेत्यादिवाक्यार्थानामधमत्वस्य
भवदुक्तरीत्याप्रकारांतरेणानुपपद्यमानतया वाच्यसिद्ध्यंगत्वेन रमणरूपव्यंग्यस्य गुणीभूतव्यंग्यत्वप्रसंगात्। तस्माद्वाच्यार्थसाधारण्यमे
वोचितं विदग्धनायिकाप्रयुक्तनिःशेषेत्यादिवाक्यार्थानां। अधमत्वोक्तिरपि प्राचीनानामेव साटानामप्यपराधानामसह्यतांहृतीप्र
तिप्रतिपादयितु। न तु संभोगं। विदग्धोत्तमनायिकायाः सखीसमक्षं स्फुटतया तत्प्रकाशनानौचित्यादिति। तदेतदपातरमणीयं हृदयंगमोद्भा
वने। आशयानवबोधात्। तथाहि। व्यंग्यतदितरकोटिसाधारण्यस्य वाक्यार्थस्य व्यंग्यकोटिभूयःसहचारगृहो व्यंजनायामुपयुज्यते प्रकृते
चतादिमात्रे चंदनच्यवादिकं संभोगेन भूयः सहचरितमिति तेन तद्व्यंजनमिति तात्पर्यं। सामान्यतश्चंदनच्यवादि स्नानसाधारणं। तटादि
घटितं स्नानेन भूयः साहचरितं किंतु संभोगेनैव। एवं साधारण्यव्याहृत्तिरभिप्रेता न तु सर्वथा स्नानव्यावृत्तिः संभोगैकांतिकता वा येन प्रकाशोदि
विरोधः स्यात्। इयमाश्लेषपक्षे तैवेत्याद्येवकारेपि संभावनाप्राचुर्यबोधको वक्तव्यादेवदत्त एवायमित्यादिवत्। अस्तु गस्नानव्याहृत्तिरभिप्रे

एस॰
५

तानत्वे तावतासंभोगेकांतिकत्वं· आर्द्रवसनपोंछनो नापि तथाविधचंदनव्यवादेः संभवादिति नानुमानेन गतार्थता· तथासति वाची
स्नानव्यावर्त्तनेकः पुरुषार्थ इति चेत्· व्यंग्यबोध एवेति ब्रूमः द्वयोः संभावितयोरेकव्यावृत्तिबोधस्यापरान्वेषहेतुत्वस्यानुभवसि
द्धत्वा· अत एवोक्तं सुबुद्धिमिश्रैः॥ तस्माद्वाच्यव्यंग्योभयसाधारणो हेतुरेकत्र बाधितोन्यत्र पर्यवस्यतीसेव ज्ञायइति। यत्तु स्नानव्यावृ
त्तेर्विरुद्धलक्षणायस्यात्तदंतिकंगतासीत्संशयव्यंग्यताहानिरित्युक्तं· तत्रोच्यते· स्यादेवं यदि स्नानव्यावृत्तेर्विरुद्धलक्षणायस्यात्त
दंतिकंगतासीत्संशयव्यंग्यताहानिरित्युक्तं· तत्रोच्यते· स्यादेवं यदि स्नानव्यावृत्तिर्वाच्यार्थदशायामेव गम्येत· वाक्यार्थप्रतीसनेन
रंतुप्रतीत्या तया व्यंग्यान्वेष इति न लक्षणावकाशः नहि तदमेव तथाविधमिति प्राथमिकबोधः· तस्याव्यर्थसंतत् किं विस्तारयतीति
न्यायालोचनोत्तरभावित्वादिति न तत्प्रयुक्तस्नानव्यावृत्तिबोधः अत एव दीपिकाकृता पदांतरासाित्वमार्थतयाप्युपपद्यमानानि तत्रा
ह्निग्वेनैवतदनुकूलार्थव्यंजकानीत्युक्ता तथाप्युत्तचंदनेन तु सालितचंदने· स्तनयोस्तटं न तु निम्नोन्नभागोपि· निःशेषतोस्पष्टरा
गोन्वीषन्नाहरश्याधरोनुपुनरुत्तरोष्ठोपीसादिनाऽनुकूलार्थप्रदर्शनं कृतं· अस्तु वा तदंशेलक्षणा· रंतुमितिफलांशस्येव व्यंग्यत

उ०र० ६

याध्वनितास्तु ते॥ यत्तु फलांशस्यापि नयंगपत्वसंभवः अधमत्वमापद्यः स्पष्टत्वमित्यादिनासंदर्भेणाभवतैवाथोपपत्तिर्वेद्यतायाउक्तत्वादित्यु
क्तं॰ तदयुक्तं॰ न खल्वधमत्वमपकृष्टत्वमित्यादिनाग्रंथेन संभोगं विनाधमत्वस्यानुपपत्तिरुच्यते किं तु नोऽन्यमनायिकावदतिनोद्दूत्या
दनार्हमित्यादिनावक्रवैशिष्ट्यप्रतिपादनेनव्यंग्यपर्यवसानमात्रं॰ एतेन संभोगरूपव्यंग्यस्य वाच्यसिद्धांगत्वेन गुणीभूतव्यंग्य
त्वापत्तिरितिनिरस्तमिति कृतं तयहुविनतेन॰ यत्तु॰ उपनायकमानेतुं प्रेषितां तदुपभोमलुन्मचंद्रनादीन्वापीस्नानव्याजेन गोपयं
ती दूतीं प्रति नायिकाया इयमुक्तिरितिभूमिकारचनं॰ तन्न मनोहरं॰ तथासति स्नानस्यहूस ऽभ्युपगतत्वेन तदुपपादकनिःशेष
सादिवाक्यस्यासंगतत्वापत्तेः संभोगप्रकाशनस्यापि स्नानकार्यप्रकाशनमुखेनैवकर्तव्यत्वात्। किंच स्नानतदंतिकगमनयोर्द्व
योरपि दूत्यानिवेदितयोरेकस्य सत्त्वेऽपरस्यापि सत्त्वमेव संभाव्यते न नु मिथ्यात्वमिति तदंतिकगमनस्य मिथ्यात्वोपन्या
सोऽनिर्बीजयवस्यात्। स्नानमभ्युपगतस्नानसाधनेतु प्रतारकतयातदंतिकगमनस्यमिथ्यात्वोपन्यासोऽप्युक्तइति सहृदयैराकलनी
यमिति॥ ९॥ श्यामामतरुणामिति॥ श्यामामतरुणां मुग्धः पञ्चशरस्य रूपस्य मुरलच्छायामुदे हातिशयो वामाक्षिनाभवती सन्त्ययः श्यामेव

रम० ६

कंतरुणं· तेन दुर्लभतरस्त्वनं· ग्रामेति विशेषणेन निरंतरसंनिधानान्संकेतदानयोग्यता· नितरांध्वमतं इति दीपिकाकारः· एवं सति
दिनांतरेऽपि संभोगप्रत्याशानुदयो विप्रलंभस्य लघुत्वापत्तेः शृंगारोत्कर्षमेव ज्ञायत इति नव्याः· ग्रामस्य स्त्रीसमूहस्य संबंधी तरुणार स्य
र्यक्ते नोनेकनारीप्रार्थ्यमानत्वं सूच्यत इति केचित्· परिचितत्वेन मुहुर्दर्शनेऽपि त्रपाकानुदयाय ग्रामेति विशेषणमित्यन्ये· मुहुर्वारं·
जनताभयेन दर्शनेऽसातत्संभवात्· पुंश्यसाभवतीति वर्तमाननिर्देशाभ्यां दर्शनमलिनीभावयोरविरामः सूच्यते· जनकी भ
तदर्शनसमकालतया कार्यसमुत्खछायामालिन्यस्य कथनादतिशयोक्तिरलंकारः· तरुणपारति· द्वयोस्तरुणत्वोक्त्या पर
स्परानुरागोत्कर्षो व्यज्यते· छाया कांतिः· नितरां· अतिशयेनेति केचिन्नु· मुहुरिति समं मलिनाभवतीत्यनेनान्वयः· तेन यद्यपदा
तदनुसंधानं तदा तदानुतापोत्कर्षान्मुखमालिन्यप्रकर्ष इति सरसाङ्कः· तवेसाहि मलिनीभावोपपादकं तरुणविशेषणं· न
वान्न्तनावं जुलस्याशोकस्य मंजरी तया समाश्योयुक्तः· करणयस्तत या भूतं· अत्र नवेन सनेन नूतनवस्त्रग्रहणस्योचितेन नावित
करणीयता सूच्यते रसाङ्कः· नूतनस्पर्शिनोचितेन शंकानुदयाय नवेति विशेषणमिति केचित्· उद्दीपनप्रकर्षायेति तु सरसः·

उदा॰च॰
७

एवं च संकेतनिकेतनचिह्नहस्तनायककर्दर्शनकृतमालिन्यं विषादरूपव्यभिचारिभावोत्कर्षव्यंजनमुखेन विप्रलंभाभासं पुष्णातीति ॥३॥ स्वच्छंदेति॥ मंदाकिनीव मंदतां अनूपमिंथादिनियोजना· मंदाकिनी स्वर्गगंगा· वः युष्माकं· मंदस्य मूढस्य भावो मंदता अज्ञानं· उपमिसमे· पापेनाय ह्रष्टतामिसपरो· अन्हाय· झटिति· मिधात्· नाशयत्विति आशीः· सजातीयांतरादुत्कर्षप्रतिपादकं मंदाकिनीविशेषणमाह स्वच्छंदे इत्यादि· स्वच्छं दउच्छलत् अच्छं कच्छकुहरे च्छातेतरे तत्य स्वं तस्मच्छं त्याम् छंन्नो होयेषां ते महर्षिभिर्हर्षेण विहिते स्नानान्हिकेयस्यामिति समासयोजना स्वच्छंदं स्ववशः न नु वातादिपरतंत्रं· ते न जलवाहुल्यात् गांभीर्यामित्यर्थः स्वस्य च्छंदो ऽभिप्रायः ऽत्र च्छाय तत्र तथा उच्छलतादिति क्रियाविशेषणं वा· स्वस्मच्छंदेनोच्छलदिति वा· अच्छे निर्मलं· कच्छस्य· जलप्रायदेशस्य कुहरे तरंगकृते विले च्छातात् दुर्बलादितरत्वेगातिशयेन बलवदिस्यर्थः· छातमल्पमितितु न सम्यक्· स्वच्छंदोच्छलदित्सनेनैव बाहुल्यलाभात्· इतरांतमं बुच्छटाविशेषणं· छातं कृस्वं तदितरा दीर्घा इत्यर्थ इति तु कश्चित्· अंबुनः जलस्य च्छटा· परंपरा· मूर्च्छन् न नश्यन् मोहो ऽज्ञानं· अतएव हर्षः स्नानसमाधानात्स्थायी उपन्यासः· यद्वा आन्हिकबाहिर्भूते स्ना

राम॰
७

पित्सानस्यलाभाय सः। छटा॰ परंपरा॰ कांतिर्व्रा तयाभ्रूर्ध्वं नु मातुर्भवन्मोहोऽरवैचित्र्य संविस्मयो येषामतिव्याख्यानं तु न शब्दस्वर
मानुसारि॰ एवं महर्षिसेवितले नतीर्थांतरा द्यतिरेकं प्रतिपाद्य नघंतरात्कर्षस्तु भावकृतं प्रतिपादयितुं पुनर्विशिनष्टि॰ उद्घं
दिसादिना॥ उद्घंसः प्रकाशमानाः उदरा महांतो दर्दुराभे कायासु एवंविधा दर्या ८ कंदरा यस्मां सा तथा भूता॰ तरंगाभिघा
तैरुपरिभागभंगेन तासां प्रकाशनात्॰ तथा॰ दीर्घीकृताः आयातः अद्रिद्रः शाखादिबाहुल्येनाकृशा ये द्रुमास्तेषां मदमोदी
र्घ इति हेषात् द्रोहः पातनं ते नोद्रेकः आधिक्यं तन्मया प्राप्तपुष्का दुर्मयस्तरंगास्त एव मद्गुरोन्निविटोमरोग वीर्यसा सातथा॰
महोर्मीति पाठे॰ तेनोद्रेको येषां मेवंविधा ये महोर्मय इति आख्येयं॰ दीपिकाकारस्तु॰ दीर्घेति भाव प्रधानं तेन दीर्घत्वोनादरि
रति लभते॰ यद्वा दीर्घं संतमेकं मंदाकिनीविशेषणं॰ तदा च दरीषु दीर्घा विस्तृते सर्पेः अद्रिद्रेसादिद्वितीयं॰ यद्वा तत्रापि
नाकारप्रश्लेषः॰ दरिद्रत्वं चमवाहसंबंधान्तु छमूलतया ग्लानत्वमित्याह॰ दर्दुरः पर्वतविशेषः॰ अमस्पाकपङ्कः हरेतिपेन
रुक्ष्माय पत्रैः॰ मंदाकिनी च न गंगा॰ किंतु नघंतरमेव॰ तत्रैव दर्दुरगिरिसंबंधसंभवादिति कश्चित्॰ इदं तु प्रसिद्धिविरोधादुपेक्ष्यम्॰ अ

नुप्रासो । ऽत्र शब्दालंकारः काव्यजीवातुः अभिप्रायवशेऽर्थच्छेदाविसमरः अमांसो दुर्बलश्छात इतिच । मोहमिच्छंति मूर्छायामविद्यायांच स्म
रयइति विश्वः । मठाल्मायदुनिर्भाग्यामंदाः इत्यमरः ॥ ७ ॥ विनिर्गतमिति । हयग्रीवनामा दैत्यो विष्णुना हत इति पुराणकथाश्रितेहय
ग्रीववधाख्येनाटके हयग्रीववर्णनप्रस्तावे पद्यमेतत् । पंप्ररूतं हयग्रीवं शत्रूणां । मानं पातिखंडयति । मित्राणां ददातीति मानदस्त
थाभूतं आत्मनो मंदिरात् गृहात् न तु नगरात् । यदृच्छयापि । स्वेच्छया । न प्रयुत्नया । विनिर्गतं निःसृतं न तु प्रस्थितं । उपश्रुत्य
कर्णाकर्णिकया श्रुत्वा । न तु दृष्टमुखात् । ससंभ्रमेण सभयेनेंद्रेण । अस्याहतैश्वर्येण दौवारिकाज्ञानविलंबासहतयास्व
यमेव । द्रुतं शीघ्रं यथा तथा पथा कथंचित् निक्षिप्तान तु विन्यस्य निहिता अर्गला द्वारपिधानकाष्ठं यस्यां सातथाविधाम
मरावतीनगरीभियानिनी लिते संकुचिते अक्षिणी यया सा नम्लोत्प्रेक्षा । ऽर्थालंकार श्चमत्कारविश्रामभूमिरितिनीरस
त्वमित्याऊः ॥ इति श्रीतत्सद्भट्टसुब्रह्मण्याभिधानतत्सूनुमहोपाध्यायवैद्यनाथकृतायामुदाहरणचंद्रिकायां प्रथमउल्लासः ॥ ॥
काचिदंगनायकसंगमाभिनीशाकंधनाधानयनया जेनबहिर्गतुं मातरं प्रत्याह । माएइति ॥ मातर्गृहोपकरणमद्य खलु नास्ती

तिसाधितं त्वया। तस्मात्किं करणीयमेवमेव वनवासरः स्थायीति संस्कृतम् ग्रामो मातः गृहसंबंधि उपकरणं। उपक्रियते अनेनेत्यु
पकरणं अन्नेंधनशाकादिसामग्री अथ खलु निश्चितं। नास्तीति त्वया साधितं प्रतिपादितं। तत् तस्मात् किं करणीयं कर्तव्यम
ण। वृद्ध। आज्ञापयेति यावत्। यतो वासरो दिवसः एवमेव। अधुना दृश्यमानावस्थ एव स्थायी स्थिरो नेति वाक्यार्थः। अत्र नातरिस
नेनालंघनीयाज्ञत्वं। गृहे सनेनावश्यकर्त्तव्यं उपकरणाभिसनेनाम यासिद्धिपरिहारः। सकलस्य प्रतिवेशिगृहादपि लाभास
भवात्। अघेसनेनाधेवसंपाद्यत्वं साधितमिसनेन सकलशंकाराहित्यं त्वये सनेन सकलस्य नाविरहः। तच्छेदेन हेतुत्वेन नावश्यपद
क्रमत्वं। भरोसनेन सप्रेरणं। एवमेवे सनेन दिनावसाने त्वत्प्रेरणया पितृकुलगमनपामयानगतत्वमिति त्वरया प्रेरयेति वा ध्वा
सते। वाक्यार्थेन तु वक्रवैशिष्ट्यादुपपन्निसमाप्तित्वमिति॥ अन्ये तु। प्रसहं गृहकार्यव्याप्रतत्वेयास्वैरविहारं कर्तुम् असङ्गात् काचि
न्मातरं प्रसाह। मातः इति। गृहोपकरणं। गृहकार्यं। अद्य नास्ति। न त्वं मदातथ्यात् एतावन्मम करणीयं वसतः इस्यति प्रसंगशंकानि
वारणं। एवमेव। व्यासंगं विना। तथा च व्यासंगं विना स्थातुमशक्यत्वात् गृहे च कार्याभावात् किंचित्कार्यार्थं बहिः प्रेषयेतिता स

र्यार्थरसाढ्य॥ रसंतुतमसंगच्छेत्पदिवासरोनगच्छतीतिपाठः स्यात्॰ नचतादृशः पाठोस्माभिरपिस्वीकृतः॰ किंच॰ कार्यस्यावश्यकर्त
व्यत्वज्ञापनंविनानतथाशंकाप्रसरःसंमस्तुतानावश्यकतयाशंकैवसंभाविततेतिएवंव्याख्येवज्ञायसीति॥ ६॥ साहंतीति॥ प्रि
यानुनयार्थंप्रहितांतमुपभुज्यागतांसखींप्रतिनायिकायाईर्ष्ययोक्तिः॥ साधयंतीसखिसुभगंस्त्वरोक्षरोहंनासिमत्कृते॥ स
द्भावस्नेहकरणीयसदृशंतावद्विरचितंत्वयेतिसंस्कृतंहेसखिमत्कृतेमहर्षंसुभगंसुंदरंनायकंसाधयंतीआत्मवशंकुर्वतीअनु
नयंतीवा॰ साहंतीशासतीतिचंडीदासः॰ साहयंतीनिपाठेपिसाधयंतीत्येवार्थः स्वरोक्षरोहंनासिरिवन्नासि॰ त्वयातावत्त्वया
तुसद्भावः साधुत्वं॰ विश्वासोवास्नेहः प्रसिद्धस्ताभ्यांकरणीयंकार्यं तत्सदृशंताभ्यांयादृशंकार्यंतादृशंविरचितंनंफलंतुदेवा
यत्तमितिनिगूढार्थः केचित्तु॰ सद्भावस्यकरणीयस्नेहस्यसदृशमुचितमितियोजयंति॰ अत्रचज्ञातापकारायांमुख्यार्थबाधप्रति
संधानात्सदृशपदेनविसदृशंलक्ष्यते॰ तच्चमत्यंतपरमरागेनशत्रुत्वाचरणरूपं॰ एवंमत्कृतेइतिसमलस्वरणायास्वकृतरतिर्हनासी
सस्वत्वदृष्टीसीसर्थः॥ स्वयवामत्कृतेक्षणामपिनहनासीसर्थः तेनचनायकः सापराधइतिरोषमूलंनायिकायाज्ञानंसामाजि

कान्तप्रतिमज्जतइति ७ उच्चरिणिश्चलेति· उच्चरत्सअयंपदच्छेदःसर्थः· पद्मपनिश्चलनिष्पंदाविसिनीपत्रेराजतेवलाका· निर्मलमरक
तभाजनपरिस्थिताशंखशुक्तिरिवेतिसंस्कृतं· काचिदुपनायकंप्रतिवदति· विसिनीकमलिनीतस्याः पत्रेवलाकापक्षिभेदः राजते
शोभतेत्वंपश्येतिवाक्यार्थस्यकर्मत्वेनान्वयः· समीहितस्यचनायर्थि। शनष्टि· निश्चलेत्यादि· निश्चलाचासौनिष्पंदेतिकर्मधा
रयः· चलनंशरीरक्रियास्थानांतरप्रापिका· स्पंदस्त्ववयवक्रियातदप्रापिका· स्पदिकिंचिच्चलनइतिधात्वनुसारात्· यद्वा· निश्चल·
जनशंकयानिरुद्योगेतिकामुकसंबोधनमितिदीपिकाकारः· अत्रद्वितीयकल्पेसंकेतस्थानरूपव्यंग्यस्यवाच्यसिद्ध्यंगतापत्तिः एनज्जं
केतस्थानंत्वयानानुसंहितमेवैवोन्नीतमितिज्ञानेनैवनिरुद्यमत्वसिद्धेरितिकेचित्· निश्चलत्वंस्वप्रयत्नाधीनक्रियाशून्यत्वं· निःस्पंद
त्वंस्वानधीनक्रियाशून्यत्वमितिसपौनरुक्त्यं· एवंचवातादिसंचारशून्यत्वमपिसूच्यतइत्याहुः· निश्चलोचलः पर्वतस्तद्वन्निःस्पंदेत्यर्थः· अथ
वानिश्चलापृथिवीवनिष्पंदेत्यर्थइत्यन्ये· तदयुक्तं· उभयत्रापिचलपदस्यपरिहृत्यसहत्वात्· पृथिवीवाचकत्वेनाभिमतस्यनिश्चलपदस्यस्त्री
लिंगनियतत्वेनभाषितपुंस्कत्वाभावात्सुंवद्भावानुपपत्तौनिश्चलेतिह्रस्वानुपपत्तेश्चेति· निर्मलेत्यादि· निर्मलेस्वच्छेमरकतस्यनीलमणे

भाजनेपात्रेपरिस्थिताशंखशुक्तिः शंखघटितंशुक्तिसदृशंचंदनादिनिधानपात्रंनतुमुक्ताशुक्तिः तस्यावलाकावर्णत्वाभावात्।
शंखशुक्तिपदस्यतत्रासामर्थ्यात्। एवंचानेननोपमयासंनिकर्षोभाभावः सूच्यते स्वापेक्षिकचमत्कारस्थानंतुसंयोगवियोगभे
देनअंगद्वयंप्रकाशमकं। केचित्तु। नायिकाविरहवेदनांकामुकंप्रतिनिगूढंनिवेदयंसाः सख्याइयमुक्तिः। हेनिश्चलश्चलस
निस्पंदानिश्चेष्टावलाकायादृगतिशयात्वलेगाध्यवसितासरखीविसिनीपत्रेतापातिशयाच्छपितारा जतेत्वमेवगासपद्ये। शंख
शुक्तिरिवस्पंदेननिश्चेष्टत्वातिशयस्तेनचविमलंभातिशयोव्यंग्यपरसाङ्कः ८ मुखमिति। इंदुवदनायास्तनोशरीरेतरुणिम्नउ
द्गमआविर्भावोमोदतेस्वकार्यजननेअनियंत्रितोस्तीत्यर्थः। अह्रसेवेयमिंदुवदनातत्राप्येवंविधयौवनविजृंभणामिविकष्टमाप
तितंविदग्धयुवजनैस्त्येवंखेदोवतेसनेनप्रतिपाद्यते। अहोरमणीयतातिशयइतिविस्मयोवा। भाग्येनपरमोत्सवस्थानमुपसं
पन्नंयुवजननयनानामितिहर्षोवा। वतामंत्रणासंतोषखेदानुक्रोशविस्मयरतिकोशात्। कथमित्यपेक्षायामाह। मुखमिति। यतो
मुखंविकसितंप्रसृतंस्मितं। उपहिकाक्षिनयनंस्मितंस्यास्यंदिनाधरमिन्मुकुलस्मगाहासविशेषरूपंपचतथाभूतं। एवंप्रेसितंप्रेस

णां भावेक्तः वशितो वशीकृतः स्वायत्तीकृत इति यावत् वक्रिमा वक्रत्वं येन तथाभूतं तत् यागतिर्गमनं समुच्छलिताधारारूपेणामा

दुर्भूतानिवृत्त्या विभ्रमा विलासा यस्यां न यामभूतामतिबुद्धिः अपास्तास्पष्टा संख्यापरिमितविषयस्थत्वं यया ति भावः अत्र च विका

सस्य पुष्पधर्मस्य स्मिते वशीकरणस्य चेतनधर्मस्य वक्रिमणि समुच्छलनस्य मूर्त्तधर्मस्य विभ्रमे संख्यायामर्यादायास्साग

स्य चेतनधर्मस्य मतौ मुकुलितत्वस्य पुष्पधर्मस्य स्तनयोः उद्धुरत्वस्योन्मुखत्वस्य चेतनधर्मस्य जघने मोदस्य हर्षस्याचेतनेयौ

वनोद्गमे बाधितत्वाद् विकसितादिपदैः स्ववाच्यसंबंधाश्रयणेनोपदर्शितपदार्थो लक्ष्यते तत्र विकासस्य पुष्पधर्मस्य तत्त्वस्य प्रस्त

तत्त्वमात्रेण सामान्यविशेषभावः संबंधः मनोहारित्वं व्यंग्यं एवं वशत्वस्य संबद्धत्वेन सामानाधिकरण्यं संबंधः सर्वमोग्यात्

सर्वत्र वक्रतापेक्षितस्यासीदिदानीं त्वभिमत एवेति युक्तानुरागित्वं व्यंग्यं समुच्छलनस्य प्रादुर्भूतत्वेन सामानाधिकरण्यं संबंधः

सकलवशीकारित्वं व्यंग्यम् तथा मर्यादासागरस्यापि स्वपरिमितविषयत्वेनैकाधिकरण्यं संबंधः अनुरागातिशयो व्यंग्यः

तस्य ताद्दशमतिप्रयोजकत्वात् मुकुलितत्वस्य पुष्पसंस्थानस्य ताद्दशसंस्थानमात्रेण सामान्यविशेषभावः संबंधः उन्नित

त्वेन तु सामानाधिकरण्यं· आलिंगनयोग्यत्वं व्यंग्यं· एवमुन्मुखत्वरूपस्योद्दुरत्वस्योत्कृष्टत्वेन कार्यकारणभावः संबंधः उत्कर्षस्यो
न्मुखत्वहेतुत्वात्· रमणीयत्वं व्यंग्यं· एवं मोदस्य नियंत्रितत्वेन समं हेतुहेतुमद्भावः संबंधः मोदस्य नियंत्रितत्वे हेतुत्वात्· स्पृहणी
यत्वं च व्यंग्यमिति· एतानि च काव्यभावनापरिपक्वबुद्धेः सहृदयस्यैव प्रकाशंते· दीपिकाकृतस्तु· विकासेनासंकुचितत्वसंबंधेन
सातिशयत्वं लक्ष्यते· सौरभादि व्यंग्यं· वशीकरणेन स्वाधीनत्वं लक्ष्यते· अभिमतविषयप्रवृत्तिः संबंधः समुच्छलनेन बाहुल्यं लक्ष्य
ते· प्रयोज्यप्रयोजकभावः संबंधः बहुत्वं हि समुच्छलतीति· संस्थापासनेनाधीरत्वं लक्ष्यते· हेतुहेतुमद्भावः संबंधः सर्वमुग्धतया गु
रुजनसंनिधौ प्रियतमेप्यंगीकृतमर्यादामतिरासीत् इदानीं तु मौग्ध्यसागान्नतथेस्वनुरागातिशयो व्यंग्यः· मुकुलितत्वेन काठिन्यं
लक्ष्यते· निबिडावयवत्वं संबंधः कठिनं हि तद्भवतीसाकूतः ॥९॥ श्रीपरिचर्यादिति॥ जडा अनभिज्ञा अपि जनाः श्रियो लक्ष्म्याः परिचर्यात्
संवर्षात् विदग्धानां चतुराणां यानि चरितानि चेष्टितानि तेषामभिज्ञा ज्ञातारो भवंतीत्यन्वयः अत्र दृष्टांतमाह· उपदिशतीत्यादि· पद्यायौ
वनस्य मदो हर्षभर इति यावत् सः स्वकामिनीनां स्त्रीणां ललितानि· सुकुमारतया अंगानां विन्यासो ललितं भवेदित्युक्तलक्षणं ललित

भ्रमतीन् विलासविब्बोकादीन् हावान्·बहुवचनस्याद्यर्थत्वात्·संचरणाद्दर्शनवचनहसितादिगतभंगिविशेषानिति केचित्·य
त्तु·ललितानि·विभ्रमानिति व्याख्यानं तत्र च विभ्रमाललितं तथैसमर इति प्रमाणोयन्मसनं तम्प्रांतिविलसितं·स्त्रीणां विलास
विब्बोकविभ्रमाललितं तथा·हेलालीलेसमी हावाः क्रियाः शृंगारभावजा इति कोशवाक्यस्य विलासादिषु हावपदशक्तिप्रतिपाद
नार्थत्वादिति·उपदिशति·अज्ञातानि ज्ञापयति·अत्र शाहुकरणाकाज्ञातज्ञापनस्योपदेशपदार्थस्य वक्तृधर्मत्वेन यौवनमदेशाधा
त्साभावविशेषभावसंबंधेनाज्ञातज्ञापनमात्रं लक्ष्यते·ललितज्ञाने॰नायासोव्यंग्यः प्रयोजनं सत्त्वदयासत्त्वदयवैषम्·उपदे
शादनायासेन ज्ञानमिसस्य प्रसिद्धत्वात्·।मदोरेतसिकस्तूर्यांगवैहर्षेभदानयोरिति विश्वः·परन्तु·ज्ञाने॰मनिरपेक्षत्वं कं गपानि
ति·तन्न·तस्मदएवैसेक्कारवाच्यत्वादिति·॥१०॥ एहहमेत्तेति॥सौंदर्यातिशयशालिमानयनगोवरमगतायाणाश्रवणामात्रज
निताऽनुरागेणनायकेनावस्थायांएष्टायांहसाइयमुक्तिः॥एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्यां·एतावन्मात्रावस्था
एतावन्मात्रैर्दिवसैरिति संस्कृतं·परिमाणोदहमस्यय:एतावत्परिमाणोच्यामलकादिपरिमाणोस्तनोपमा:स्तातथाभूता·एवमेता

उरा॰ च॰
१२

वसरिमाणं य यो ऽस्ति एतावन्मात्रे विवक्षितकमलदलादिपरिमाणे ताभ्यामाक्षिपत्राभ्यां नयनदलाभ्यामुपलक्षिते सर्घः उपलक्षणोत्प
तीयानुशासनात्॰ तथा एतावत् विवक्षितं परिमाणं दीर्घादि यस्याः सा तथाभूता अवस्था स्वरूपं यस्याः सा तथा॰ एवमेतावत्त्वबुद्धिस्थप
रिमाणसंख्याये षां तथाविधैर्दिवसैर्लक्षणया मासैर्वत्सरैरुपलक्षितापरिच्छिन्नेनियावत्॰ वर्षकथनस्यैव प्रायशो लोकव्यवहारसि
द्धत्वात्॰ दिवसैरितिकरणेवात्तीयां॰ अत्र मुकुलाकारहस्ताभिनयेनास्तनपरिमाणविशेषे पद्मदलाकृतिना तेन नेत्रपरिमाणविशे
षे॰ उन्नतापुष्टिप्रदर्शकेन तदिहशेषे स्वाङ्गुल्यङ्कधारणादिरूपेण च दिवससंख्याविशेषे बुद्धिस्थमात्रशक्त्या एतावच्छब्दानियमितशक्त्यः॥
यत्तु प्रोषितं प्रति तत्कलत्रावस्थाकथनमिदमिति॰ तन्नातिसमीचीनं॰ दिवससंख्याकथनासामंजस्यादिति॰ ११ भद्रात्मन इति॰ य
स्य प्रकृतरणः करो हस्तः सततं निरंतरं दानस्य वितरणस्य अंबुधिः पयस्तु तस्य सेकेन सुभगः शोभनो ऽभद्रि सन्वयः कीदृशस्य यस्य भद्रः
शोभनस्यात्मा स्वरूपमंतःकरणं वा यस्य तथाभूतस्य॰ तथा दुरधिरोहा अनाध्यष्यातनुः शरीरं यस्य तथाभूतस्य॰ एवं विशाले म
हतिवंशे कुले उन्नतिर्महत्त्वं यस्य तथाविधस्य॰ विशालस्य वंशस्योन्नतिर्यस्मादिति वा॰ तथा कृतः शिलीमुखानां बाणानां संग्रहः समी

रा॰ म॰
१२

वीनोग्रहो॰ भासदार्घ्यं येन तस्य॰ तथा अनुपप्लुता अबाधिता गतिर्ज्ञानं यस्य ताहृशस्य॰ अनुपप्लुतानां निर्दुष्टानां गतिर्हितकर्चेति॰
दीपिकायां॰ परान् शत्रून् वारयतीति परवारणः तस्येति राजपक्षे॰ गजपक्षे तु॰ परस्य परवारणस्य श्रेष्ठगजस्य करः शुंडादंडः दाना
बु॰ मदजलं॰ महात्मनो भद्रजातीयस्य॰ भद्रो मंद्रो मृगश्चैवेत्युक्ताः एते त्रयो गजयोनयः इत्युक्तेः॰ तथा दुःखेनाधिरोहः आरोहणं यस्मा
स्तादृशी तनुर्यस्येति असुखत्वात्॰ विशालवंशवत् दीर्घवेणुवत् उन्नतिरुच्चता यस्य॰ पक्षे विशालावंशस्य पृष्ठदंडस्योन्नतिर्यस्येति॰
शिलीमुखाः भ्रमराः॰ संग्रहः आकर्षणं॰ अनुपप्लुतगतेः अस्खलितगमनस्य धीरगतेर्वैत्यर्थः॰ अत्र प्रकरणाद्राजवृत्तांतो वाच्योग
जवृत्तांतस्तु व्यंग्य इति ११ इति श्रीमज्जगदुपाध्यायश्रीवैद्यरघुनाथकृतायामुदाहरणचंद्रिकायां द्वितीय उल्लासः॥ ॥एकाकिना
नदीगतायात्वयाम्बाः कुतोयमीदृशः श्रम इति वितर्कयंती समानशीलां प्रतिवेशिनीं प्रति काचिदाह॰ स्वरपि डुलमिति॰ अतिपृथु
लंजलकुंभं गृहीत्वा समागतास्मि सखि त्वरितं॰ श्रमस्वेदसलिलनिःश्वासनिःसहा विश्राम्यामि क्षणम्॥ विउलमिति पाठे विपुल
मित्यर्थः॰ सखी समताऽयता ध्वनेनं॰ अतिशयेन पृथुलं महांतं जलपूर्णं कुंभं तेन दुर्वहत्वं॰ गृहीत्वा समागतास्मि न तु मध्ये विश्रामः॰ त्व

गितमितिखेदातिशययोग्यताध्वन्यते॰ श्रमाद्घोऽस्वेदसलिलनिःश्वासौ ताभ्यां निःसहा निर्वलाच्चलितुमक्षमेतियावत्॰ सलिल
लोऽस्या स्वेदवाङ्लसंव्यज्यते॰ अतः क्षणं विश्राम्यामि विश्रामं करोमि॰ तथाचैवंविधकुंभवहनजन्योयंश्रमो नास्याशंकिष्ठा
इतिरतगोपनं गम्यते १२ श्वोसिदमिति॰ कृतकामुकोपभोगां हृतांमतीयमुक्तिः श्वोन्त्रिउष्णं दीर्घलंबं चिंताश्वलसत्वसनिः
श्वसितं॰ ममअमंदभागिन्याः कृते सखि त्वामपि परिभवति॥ मह कोरं मदीयमितिवा॰ तुहेतिकर्मणि षष्ठी॰ परिभवतीत्यस्य हिंसार्थत्वा
दितसाङः॰ तुहेतिद्वितीयांतमेव॰ तथानुशासनादिति दीपिका॰ तदातुत्वामिति संस्कृते॰ तुहवीसनंतरं अहहे ति कचित्पाठः सनयुक्तः॰ इ
त्रहा निहोषादितिकेचित॰ तन्न॰ गाथाभंगे पिछंदोनराभंगादिति चंडीदासः॥ हे सखि सन्निःश्वसितं श्वौत्रिज्यादिकं कर्तृ मंदभागिन्या
ममकृते मदर्थं त्वामपि परिभवति पीडयतीत्यन्वयः॰ निःश्वसितं निःश्वासस्तत्सहितं उष्णिदृष्मगतनिद्रस्यभावश्वोष्ण्यं॰ मंदः अ
ल्पः भागो भागधेयं विद्यते ऽस्याः सा तथा॰ मां तावत् परिभवत्येव॰ मत्कार्यार्थमागमनादिकामुकप्रसादनव्यापारेण त्वामपीत्यप
र्थः मदीयमित्यर्थे तु मदीयमेतत् त्वामपि स्नेहवशात् परिभवतीत्यर्थः अतएव सखीतिसंबोधनं॰ एतेन स्वीयस्यौष्ण्यादेरत्यपरिभाव

कत्वायोगात्स्वीयसजातीयलक्षणोऽस्य पास्तं· एकेनोभयपरिभवाभावे व्यर्थसमुच्चयानुपपन्नेश्च· अत्र वो द्रव्यवैशिष्ट्येन कामुकोपभोग
भक्तिः· भोगो रूपाद्युके भोक्ताभागो धेये कदेशयोरिति विश्वः॥२४॥ तथामतामिति· वेणीसंवरणोऽध्यायेः एवं युष्मासु प्रतीयेषु कदाचि
त् खिद्यते गुरुरिति मद्देवी अन्यं नेतरं गुरुः· किं खेदमपि जानाती सुपक्वमभीमसेनोक्तिरियं· अत्रे स्यामि सध्यात्मस्वगुरुर्गौरवेणा साक्षा
दनभियोज्योयुधिष्ठिरः इत्थं खिन्नमपि· खिद्यते नेनेति खेदो मात्सर्यं भजति कुरुषु अथापि एवं दुरवस्थायां गमपि न भजतीति सोपहास
काकुः· खेदहेतुमाह· नृपेरेवसदः सभातस्यां पांचालदेशाधिपस्य राज्ञस्तनयां जन्मप्रभृत्स परिभूतां अस्मसरि अयहेणो वृतथा
भृतां स्त्रीधर्मिणी दुःशासनाकृष्टकेशपाशाविशिष्य भवतोन्निधावपि· अवाच्यावस्थां दृष्ट्वा खेदं भजती त्यन्वयः· उषितं स्थितं
मिति भावे क्तप्रत्यये द्वितीयात दृष्ट्वन्यस्य कर्म· तथा च वल्कलधरैः स्माभिर्वने व्याधैः सार्द्धं न तु वानप्रस्थैः नृपादिभिर्यदुषितं विराट
स्य राज्ञश्चावासे गृहे अनुचितस्य सदादिवेषस्य आरंभेणानिभृतं गुप्तं यथा स्यात्तथा स्थितं च दृष्ट्वेत्सर्थः· दीपिकाकृतस्तु· दृष्ट्वेसेतदु
षितमित्यनेन समानकर्तृकं· संनिधानात्· तेन पंचानामपि त्वद्दर्शनं लभात रसाद्धः· अर्वांच सक्त वल्कलधरैः व्याधैः सहोषितं मां दृष्ट्वा

उदा॰च॰
१५

विराटस्मावासेस्थितंचमांदृष्ट्वासर्षमाह॥ अत्रकाकुवैशिष्ट्यान्मास्त्वयैष्यासंतानोचित्रसंध्यमते॥१५॥ तदस्त्वाइति। तदाममगंडस्थलनिम
ग्नांदृष्टिंननयस्यमत्र·इदानीमेवाहंतौचकपोलौनसादृष्टिरितिसंस्कृतं·नायिकाभयेननिकटवर्त्तिनीममांसात्सास्यदृपहायनायिकाक
पोलगतंतत्प्रतिबिंबंनायिकामुखावलोकननिषेणापहृतंनायकंप्रतिप्रतिबिंबापगमेदृष्टिविकारेणात्तातरहस्यायानायिकाया
इयमुक्तिः।तदासा।कामिनीमत्संनिधावासीत्·निमग्ना·अनिमेषतयातथाभूतामिव·तामित्यमितिपाठेनमिनांनिहितामित्सर्थः
सैवाहमिति·तदवस्थैवेसर्थः·सा·स्निग्धाःनिमेषा·तथाचसखीसांनिध्यातिरिक्तसकलसत्वेनाहशदृष्टिविरहस्तदेशनीयदात्म
कवाक्यगम्यःसखीसांनिध्याभावस्यस्वप्रयोजकत्वमवगमयतीतिवाक्यवैशिष्ट्योदाहरणं॥१६॥ उद्देशोयमिति। नायिकांप्रतिर
मणार्थिनःकामुकस्योक्तिरियम्·हसावा·हेतन्वि·कंदर्पवेदनयातनुतायोगिनिअयंनर्मदायाःनर्मददातीतिनर्मदानतुयथा
कथंचित्नदीतस्याः उद्देशःऊर्ध्वोदेशःस्ववलनभयेनसंवृतामनवलोकनीयस्तिष्ठतीत्यन्वयः उद्दिश्यतेदानदेवजनैर्नपुन
र्गम्यतइतिनिर्जनत्वंसूच्यतइतिदीपिकायां·कीदृशस्तत्राहसरसेसादि·सरसानांस्निग्धानांकदलीनांश्रेणीपेक्षयायाशोभातयाञ्चति

राम॰
१५

शायीअतिशयितः अत्रसरसत्वेनमुग्धपर्णाध्वनिराहितंश्रोणीत्वेनचवेष्टनंगम्यते·तथा·कुंजानामुत्कर्षेणगुंजन्मधुकरकरंबि
तकुसुमसमध्यादिरूपेणांकुरितः अभूतप्रादुर्भूतः रमणीमांविभ्रमोविलासोयत्रसः तथाचानुसन्त्रविलासानामपिनववन
वीन्मेषशालिविलासोदयात्भवसाः कामवैमुख्येदुरुत्तरंव्यसनंस्यादितिभावः नकेवलमेतावद्देववैमुख्येबाधकंकिंत्वन्यदपि
बलवदस्तीत्याहकिंचेति· एतस्मिन्प्रदेशेते· शेसमांघसोगंध्यावनत्रयाप्रसिद्धाःवाताःवांति· कीदृशाःसुरतस्यसुहृदः श्रमघर्मा
घपतोदनेननिरतिशयानंदमयत्वरूपसुरतोत्कर्षहेतवः श्रमापनयनेनपुनःपुनःप्रवर्त्तनयासुहृदस्यमे·पेषांवातानामग्रे
मनोभूःस्मरतिचलति·मनोभूत्वेनसचेतसांदुःपरिहारइतिध्वन्यते·मर्महतेतिकेचित्·कलितोद्धतः अकांडेअनवसरेनिमित्ता
भावेइतियावत्·कोपोयेनसः सुरतवैमुख्येतुदृढंकुपितः किमिवनकरिष्यतीतिव्यज्यते· अत्रचाच्यसदेशादेरुक्तविशेषणावै
शिष्ट्यात्कामुकाभिप्रायव्यक्तिः ७ काचित्संकेतार्थिनंतटस्थतयैवसंनिहितमुपपतिंप्रतिसंकेतकालसूचनायप्रतिवेशिनी
प्रत्याह गोहर्तेरेतिनुदसनोईमनाःप्रच्छमींगेरहंभारेसकले सरामात्रेयदिसंध्यायांभवतिनवाभवत्विविप्रामरतिसंस्कृतम् अ

उद्रा॰ उ॰
१५
15

णस्यमरणा इतिपाठेत्वनन्यमना इति होरेत्यनंतरं णावरेत्यधिक पाठे केवलमिति बोध्यमनुद्दति॰ प्रेरयति॰ अनाह्वमकरणं॰ तेनअ
मादिष्याज्ञालंबनेनांपिनावकाश इति ध्वन्यते॰ गृहभारोगृहकार्यनिर्वाहः सकलइत्यनेन सार्वकालिकी अग्रतास्त्यच्यते॰ यदिस्व
णमात्रं विश्रामो भवति तर्हि सध्यायां॰ अथवानभवतीति योजना अत्र कामुकसंनिधित्वरूपादन्यसंनिधिवैशिष्ट्यात्स्वकेत
कालसूचनाभिव्यक्तिः १८ सुत्वइति श्रूयते समागमिष्यतिवत्प्रियो ह्यमहरमात्रेण एवमेवकिंमितिति हसित तत्सखि
सज्जयकरणीयम् उपपतिप्रसभिसर्तुं प्रस्थितां कायिको निवारयितुं सख्याः स्वयमुक्तिः समागमिष्यतीति श्रूयत इत्यन्व
यः श्रूयते न तु चिरकालं श्रुतं॰ सम्यक् पूर्णकाम अस्मागमिष्यति॰ प्रियरति सोत्कंठोक्तिः॰ अघ नतु दिनांतरे॰ प्रहरे मात्रेण न
विलंबेन॰ एवमेव॰ तदीयभोजनाद्युपयोगिव्यापाराहितेन॰ करणीयं रंधनादिकं सज्जयसाधयेत्यर्थः अत्रविदितरहस्यायाः स
ख्याकृतस्यप्रियागमनप्रस्तावस्य स्वाभिसरणप्रकरणाकृतत्वरूपाद्वैशिष्ट्यात्प्रस्तावपदवाच्यस्यप्रकरणस्याभिसारसंबं
धित्वरूपांद्वावैशिष्ट्यान्निवारणं व्यज्यते १९ अमत्रयूयमिति हे सख्यः यूयं अमत्र॰ रतोहं॰ कुसुमानामवचाये हस्तेनादानं॰

रा॰
१५

हस्तादाने चेरस्तेय इति घञो विधानात् तत् याचाम्यत्र हस्तन्यासस्य कुसुमवाञ्छ्यमिति प्रलोभनं · असमीसहमर्षकं · अचाहमवचायं करो
मि हेतुमाह · नाहं हरीति · ह्रियस्मात् · दूरं भ्रमितुं संचरितुं न समर्था · प्रसीदतं · प्रसन्ना भवत · अयं वः पुष्पभ्यम् अंजलिः प्रणामांज
लिः रचितः कृतः सर्वाभ्य एकोंजलिरप्यसामर्थ्यादेव · अत्र देशस्य निर्जनत्वादि वैशिष्ट्यात्त्वच्छन्नकामुकप्रेषणमाक्षिप्तं प्रतिपद्य
ते २० गुरुरुणोति गुरुजनपरवश प्रिय किं भणामि तव मंदभागिन्यहं अद्य प्रवासं व्रजसि व्रज स्वयमेव जानासि करणीयम्
तुहेति द्वितीयांतं शब्दवत् · संबंधसामान्यविवक्षया वा षष्ठी · गुरुजनः जनमात्रेन तु विदग्धः स एव वसंते प्रवासप्रेषणात् परः शत्रुस्त
स्य वशः अधीनेति संबोध्यनविशेषणं · तेनानिवार्यत्वं · प्रिये सनेन गमनेन दुःखोत्कर्षः · किं भणामि वदामि · प्रणयत्वेन निरर्थकत्वात् · मं
दभागिनी · अल्पभाग्या · यतस्त्वेवं मतिः किं मया क्रियते तत्राह · अद्येत्यादि · अद्येत्यादि · अद्य · प्रकरणात् वसंते · यत्र प्रवासिनोपि गृह
मायांति व्रजस्वेति रोषोक्तिः स्वयमेव करणीयं कर्तुमर्हं जानासि तेन स्वधैर्यं बुध्वैव प्रयोगच्छसीत्यभिप्रायः अत्रापशब्द प्रतीतात्यतिदि
नोपचीयमानत्वादि रूपाद्दसंतकालवैशिष्ट्यादिदानीं त्वद्गमनेन न जीविष्यामीति प्रज्ञते २१ द्वारेयांतेति मित्रं प्रतिनायकस्योक्ति

उ०श० च०
१६

रियम् । मयि हारस्योपांते समीपे निरंतरे निर्व्यवधाने । संतसंनिहिते सति तया मत्कृतया नायिकया सौंदर्यस्य साराणां श्रीः संपत्तिर्यत्र । सौं
दर्यसाराणां श्रेष्ठानामिव श्रीः शोभा वा यत्र तथाभूतया ऊरुयुगं मे ह्यस्य प्रसार्य परस्परेण समासक्तं संबद्धं समासादितं स्थापितं । अ
थवा भावे क्तप्रत्ययः । तथा च समासंगं प्रापितमित्यर्थः । तथा शिरःसंबंधि अंशुकं पुरतः मुखोपरि स्थानीतं । चले च पले लोचने अधः । ऽपि म
संचारिते वाचः वचनस्य ततुना नानाविधं प्रसरणं सखीषु प्रवर्तनं निवारितं । दोर्वल्लीते । भुजलते । संकोचिते । आकुंच्य मिथः संयोजिते इत्यर्थः
अत्र पंचभिर्वाक्यार्थैरुल्लासनादिचेष्टावैशिष्ट्यात् क्रमेण स्पष्टकालिंगनगूढागमनस्याप्तसमयकोलाहलराहित्यस्य पारितोषि
कालिंगनानि व्यज्यंते । अथ इत्यनेन लज्जैव शरीरकार्यमिति केचित् । तैश्चातुरत्वास्मीति रहस्यं घोसते । तत्र स्पष्टकालिंगनस्वरूपं । अ
समागतयोः प्रीतिलिंगद्योतनार्थमालिंगनं च तुष्टयं स्पष्टकं विद्धकं उद्धृष्टकं पीडितकमित्युपक्रम्य संमुखागतौ यौ प्रयोज्याया
मन्यापदेशेन गच्छतो गात्रेण गात्रस्पर्शनं स्पष्टकमिति वात्स्यायनसूत्रे दर्शितं । हृदयस्थ एव प्रियस्य दूरात् स्वांगैः स्यां गाम्येव मे ल
पित्वा स्पष्टकं नामालिंगनमित्यन्ये ॥ २२ ॥ अत्रारस्येति आश्लूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय मायथिकरात्र्यधशय्या । या

राम०
१६

मावयोर्निमस्यासीतिसंस्कृतम् स्वयंहूत्साइयमुक्तिः अज्जेतिपाठेआर्यासाध्वीनविदग्धा·निमज्जति·वाईक्यान्निसंदंशेतेनतुजा
मदूपा·तेनशंकाएहिसं·अत्रतनोभिन्नस्थलेअहं अहमेवनाम्नसहिताअत्रत्यापबोधकपदानुक्रमानिह्राणहिसंस्वस्यज्ञते·द्विवस
कमितिनिंदार्थकप्रत्ययःतस्यसमागमप्रतिकूलत्वात्·द्वितीयाचासंतसंयोगेः·दिवसकंवाच्येसर्थः।दिअहएइतिपाठेदिवसकेप्रलो
कयसम्यगवलोकय·पथिकाएअंधेतिचरहस्यगोपनाय·पथिकत्वेनअमाहिस्मरणयोग्यतायाएवंधत्तेनचस्वशय्यायतनप्रसक्तेर्घो
तनात्·अत्रयाःप्रसक्तनिषेधेरहस्यभंगापत्तेः महेत्वावयोरित्यर्थेनिपातःस्वमात्रोपादानेरहस्यप्रकाशापत्तेःतरुणान्यास्वशय्या
यतनस्यात्संतानुचितत्वात्स्वमात्रोद्देकनेपिनदोषःनिमस्यासि·शयिष्ठाः·शिासज्जंदं·शिसज्जहिसीतिपाठेनिषीदेति·निषेत्स्यसीति
संस्कृतं·अत्रगहेविघमानायाःश्वश्र्वाअतिवृद्धतयावधिरनिश्चेष्टत्वादियोगादत्रसत्त्वासत्वात्तनिःशंकंअवहएतिवक्रोक्तियाध
वेशिष्यात्यतीयतइतिदिक् २३ इतिश्रीमत्तन्नसुदुपाख्यश्रीरामभट्टात्मजवैद्यनाथकृतायामुदाहरणचंद्रिकायांतृतीयउल्लासः
तालेति तवजायंतेगुणाय दातेसत्हदयैर्गह्यंते रविकिरणानुगृहीतानिभवंतिकमलानिकमलानीतिसंस्कृतम् यदातेप्रसिद्ध

कमलानि

उदा०च०
१८
17

गुणाः सत्त्वदैर्ग्यस्थैर्य्यतेतदागुणा उत्कर्षहेतवो जायंते भवंतीत्यन्वयः दृष्टांतमाह। रवीत्यादि। अनुगृहीतानि स्पृष्टानि कमलानि सु
रभीणि आह्लादकानि वा भवंति। अत्रातथाभूतेषु कमलत्वजातिसंभावो व्यंग्यः कमलपदलक्षणालंभः इदं च काव्यमदीपगतं पद्य
म् २४ त्वामस्मीति अस्मीत्यहमर्थे। एवं च यतद्रसध्यात्वस। यतोऽत्र विदुषामसाधारणज्ञानवतां समवायः एकवाक्यतापत्र
समुदायस्तिष्ठति तेतस्मात् आत्मीयां अमतार्यमतिमास्थाय अवलंब्य अत्र स्थितिं विधेहि। इति वाक्यार्थः त्वामुपदेशार्हं अ
हमामः वच्मि। उपदिशामीत्युपदेशाक्रियाकर्मत्वेनान्वयः आदायेति पाठे गृहीत्वा। अवलंब्येति यावत् विद्वत्समवायात्मीयशरणा
नामाभ्युपर[illegible]परामवपरानभिभवनीयत्वा। बाध्यत्वानिदर्शितलक्षणामूलानि व्यंग्यानि। एवं त्वामहमित्यनयोरुभयोः श्लेषापदेश्यहि
ताहितत्वालंघनीयात्वत्वे। वचसीसमवादरणीयत्वमिति। केचित्तु स्थितिशब्देनापि सावधानस्थितिर्लक्ष्या। विपक्षच्छिद्रप्रेक्षित्वं व्यं
ग्यमित्याहुः २५ उपकृतमिति त्वया यद्रूपकृतं तत्र हि विषये किमुच्यते किं वा अथवद्वक्तात्यादृक्तुं न शक्यत इत्यर्थः भवता परं केवलं सुजन
ताम्रयिता प्रकटिता। तथा च सौजन्यप्रयुक्त एवैतावानुपकारो न तु प्रत्युपकारलाभाद्युपाधिप्रयुक्त इति भावः हे सखे ततः यस्मात्तु

रामं०
१८

जनताप्रर्थितातस्मात्· ईदृशमेवसदाविदधत्कुर्वन् शरदांवर्षाणांशतंप्राप्यसुखितंसुखयुक्तंयथास्यात्तथात्वास्तुतिष्ठेतिमुख्योर्थः स
चप्रकरणादिनाबुद्ध्यपकारिभावंप्रतिबाधितोविपरीतंलक्षयतितद्यथा· उपकृतं· अपकृतं· सुजनता· दुर्जनता· सखे· शत्रो· सुखितं· दुःखि
तमिति· अपकारातिशयोव्यंग्यः एवंविधापकारेपिप्रियवादित्वात्त्वसाधुत्वंवा· तवोपकारापकारविवेकोनास्तीतिवा· तदीयकौ
टिल्यंव्यंग्यमितिकेचित् २९ सेयमिति सेयंप्राणेश्वरीममनसः सकाशात्लोचनगोचरंगतेतिसंबंधः सापदनुध्यानसंता
नेनैतावान्कालोगमितः गोचरमितिभावप्रधाननिर्देशाद्गोचरत्वमित्यर्थः पूर्वंमनस्येवासीत्अधुनाबहिरपिदृष्टेत्यर्थः कीदृशी·
अंगेषु· नैकत्रांगे· सुधारसस्य· अमृतरसस्यच्छटाहृष्टिः परीरंभेणासर्वांगीणसंतापशांतामोहितोसादनात्· दृशोरितिसप्तमीद्विव
चनं· शोभनः स्फोटोद्भवोयस्यतथाभूतस्यकर्पूरस्यशलाकिका· अंजनवर्तिका· अतिशयितानंदहेतुत्वात्· सुष्ठुंशोभनं कृतमितिदी
पिकाशरीरिणीमूर्तिमतीमनोरथस्यश्रीः संपत्तिः केचित्तु· मनसः शरीरिणीमनोनिर्मितशरीरेत्याहुः परारंभस्यचरमत्वेपिप्राधा
न्यात्प्रागुपादानं ३० इत्थंसंभोगमुक्त्वाविप्रलंभमाह दैवादितिअद्याहंतयात्वनुभवैकवेद्यसमागमसुखयाचपलेक्षायततेदीर्घनेत्रेय —

उद॰ १८

स्यामत्तयाभृतया॰ आगमनसमये कातरदृष्टिर्दर्शनोत्सुकः स्फूर्तिकत्वेन तन्मात्रप्रकर्षोक्तिः वियुक्तस्य॰ असह्यमिति शेषः अविरलाविविशाः
विलोलाः सर्वदिक्संचारिणो जलदा यत्रैवंभूतः अयं दृश्यमानप्रकर्षः कालः समयः स एव कालो यम इति श्लेषमूलाभेदाध्यवसानं॰ स
म्यक्॰ प्रतिदिनोपचीयमानउपागतश्च॰ चकाराभ्यां तुल्यकालता व्यज्यते अविरलं निरंतरं विस्मलं दृतं यथा स्यात्तथा जलं ददातीति सततप्रस
र्थ इति कश्चित् २८ वियदिति मानवतीं प्रति सख्या इयमुक्तिः हे मुग्धे मानभंगावश्यंभावे दयितप्रयगमोपेक्षणाद्विवेकरहिते॰ प्र
णातिपरे मुहुः प्रणामशालिनि दयिते इति विषयसप्तमी प्रेमपात्रे न स्वामिमात्रे प्रसीद तद्विषयं प्रसादं कुर्वित्यन्वयः मानभंगसामग्रीमा
ह वियदित्यादि॰ वियत् आकाशं॰ अलयः भ्रमरा इव मलिना श्यामा ते अंबुगर्भा येषां ते तथाभूता मेघा यत्रेति कर्मधारयोत्तरबहुव्रीहिः
दमुचितंतथाप्यंगस्पर्शपूर्वकमिथ्यात्वनिरासस्यमुख्यत्वाययत्सात्राविवक्षितत्वान्नदोषःप्रियसंगमेथालापादिषुतत्रापिरतमध्येषु
नपुनराद्यावंतेवेतिशार्थः·यदिकिंचिदपिस्मरामीतिवाक्यमध्येसख्यःशपामीत्यस्यप्रवेशात्भिन्नत्वंप्रकृतेगुणएवविवक्षितार्थस्यस्य

रस॰
३४

लम्प्रसायनात् । सोल्लुंठोक्त्यावेकस्याएव सौभाग्यगर्वितायाः संबोधनत्वाद्भ्यासीसेकवचनं । सोत्कर्षस्य वचने तु बह्वीनां तथात्वास्य
इति बहुवचनमिति नासंगतिः । अत्र च रतकालेपि विपर्यातरवेदनेन रागस्याकृत्रिमत्वाभावेद्यतावादुकथनेनत्वमधन्येति ध्वन्यते । अ
रापिशब्दाभ्यामसंगतानौचित्यसप्रकाशनद्वारातिशयः । एवं बहुवचनस्य प्रतिरातिसमयं तथाभावस्य वचनद्वारान घ्रेज्ञकत्वं एवं शता
नातिप्रातिपदिकवचनयोश्चेति । तथात्र राढेस्मरणाभावेनप्रियकरस्पर्शमात्रेणासंमोहानंदमंथरतयाः कृत्रिमएगातिशायस्य सूचयताहं
धन्येतिव्यज्यते । इत्थं चोभयसंवलनेन व्यतिरेकालंकारत्वामइति बोधम् । ६३ दर्पांधेति यस्य राज्ञः करेकृपाणाः खड्गो युधियुद्धे वीरैः का
लीकटाक्षस्त्वव्यलोकि दृष्टः । कीदृशः दर्पेणामदेनांधस्य गंधगजस्य यस्य गंधं समाघ्राय न तिष्ठति प्रतिद्विपाः । तं गंधहस्तिनं विघात्यप
तेर्विजयावहमिसुक्तलक्षणस्य कुंभएव विशालतयातन्मध्यभागएव कपाटं तस्य कूटे अग्रभागे यासंक्रांतिः प्रवेशस्तस्यानिघ्नअधीनं
तेनवाहटसंबद्धं घनं निविडं यथ्थ्रेणितं तेन शोणारक्ताशोचिर्दीप्तिर्यस्य तादृशः कटाक्षः । कीदृशः कोपेन कषायालोहिता कांतिर्यस्य तथाभू
तः अत्र साम्यावगमानंतरमुपमानगतं सकलेत्यादिवस्तु व्यक्तीभवति ६४ गाढेति योराजायुधियुद्धे रुषाक्रोधेन निजाधरं स्वाधरोष्ठं निर्द

शनसन्न्वरीरागांशत्रूणांवधूजनस्यस्त्रीजनस्यओष्ठरूपाणिविद्रुमदलानिविद्रुमस्यनवपल्लवस्यपत्राणिप्रवालपत्राणिवा·
गाढस्यकांतदशनक्षतस्यकांतदंतव्रणस्यव्यापीडनरूपात्संकटाद्मोचयत्मोचितवान्·क्रोधाद्धैरिवृद्धेतद्वधूनांरतिक्रीडाविरहाहंस्त
स्सतेनभवतीत्यर्थः·अत्रनिर्देशान्नितिवर्तमाननिर्देशाद्धरदशनमोचनयोःकार्यकारणयोःपौर्वापर्यविपर्ययरूपातिशयोक्तिःरय
मेवंवृत्तौविरोधपदेनोक्ता·तन्मूलत्वादिति ६५ कैलासेति कैलासस्यप्रथमशिखरेमूलशिखरेवेरगुसंमूर्छनाभिर्वेणुस्यापितरा
गैः स्वरःसंमूर्छितोयत्ररागत्वंप्रतिपद्यते·मूर्छनामितितांप्राङ्गीततत्त्वविदोजनाइत्युक्तेः·विबुधानांदेवानांरमणीभिरप्सरोभिर्गी
यमानांयदीयांयस्यमहत्तस्यशङ्कःसंबंधिनींकीर्तिंश्रुत्वासरसस्निग्धबिसिमाःकमलिमाःकांडस्यमृणालस्यसंजाताशंकास्तं
घेहोभ्रांतिर्वायेषामेवंभूतास्तथास्वस्ताक्तिर्यग्भूताश्चयंगानेत्रास्याग्रंतायेषांतथाभूताश्चदिङ्मातंगादिग्गजाःश्रवणयोःकर्ण
योःसरोरूपयोःपुलिनइवसमीपदेशेहस्तंशुंडंआवर्त्तयंतिचालयंति·आहर्तुमितिशेषः·प्रथमेमुख्येसर्वोच्चइत्यर्थइतिकेचित्·धवल
त्वस्यश्रोत्राग्रास्थत्वात्स्नातापांगाइति·पुलिनइत्यनेननद्यश्रवणयोःसारस्वाध्यासान्मृणालत्वभ्रमोचितस्सूच्यते·केचित्तुश्रवणपुलिन

इति रूपकं पुल्लि नेपिविसंसंभवादित्याङ्कः ६६ केसेस्विति बलामोडिशब्दो बलात्कारे देशी· केशेषु बलात्कारेण तेन समरे जयश्री
गृहीता यथा कंदराभिर्विधुरास्तस्य हठं कंठे संस्थापिता इति संस्कृतम् जयश्रीरित्यनंतरं तथेति पूरणीयं· तेन राज्ञा समरे युद्धे ज
यश्रीर्जयलक्ष्मीर्बलात्कारेण केशेषु तथा गृहीता यथा कंदराभिर्गुहाभिस्तस्य राज्ञो विधुराः शत्रवं हठं कंठे स्वसंनिवेशे संस्था
पिता इत्यन्वयः ते न पराजिताः शत्रवः पीडनभीरुः स्वित्वहृदया इति संस्कृतम्· गाढालिंगनाय रभसेन हर्षेणावेगेन वा दयिते प्रि
ये उद्यते सति मनस्विन्या मानपीडनात् भीरुर्भयशीला इव त्वद्दयात् लघु शीघ्रं सम्यकृ निःशेषतो प्रसरतीत्यन्वयः मनस्विन्या
त्वद्दया इति वा संबंधः भीतोद्वेति पाठे भीत इवेत्यर्थः अत्र भयेति श्लेषैव प्रसा लिंगन हसितादि संभोग विजृंभणाभिव्यक्तिर्नेतु गा
ढालिंगनोद्यतेमानो प्रस्तत इत्येतावतेति सत्त्वद्दयसाक्षिकं· रभसो हर्षवेगयोरिति विश्वः ६८ जोठरमितियास्थविरमिव हसंती कु
विवदनांबुरुहबद्धविनिवेशा दर्शयति भुवनमंडलमन्यदिव जयति सा वाणी इति संस्कृतम्· या वाणी वाग्देवता तदभिन्नत्वेनाध्यवसि
ता काव्यरूपा वाक् कविवाक्· स्थविरं वृद्धं ब्रह्माणं हसंती· तदीयभुवनामत्वप्रदर्शनेनेनमसौ वोपहसनीयत्वात्· हसंतीवब्रह्मवैस्थ्यात्

उदा०
३६
36

कवेर्वदनमेवांबुरुहं पद्मं तत्र बद्धो रचितः विनिवेशः स्थितिर्यया तादृशी भवती भुवनमंडलं अनादिविलक्षणमिव दर्शयति सा जयति स
र्वोत्कर्षेणावर्तते इत्यन्वयः अत्र वदनेंबुजत्वारोपो वक्त्रगुणाः पद्मासनत्वेन वाण्यामर्पितस्तत्पादनार्थः अत एव वाणी चात्र काव्यत्व
रूपैव तस्या एव कविवदनस्थितेरिति महेशोक्तमयुक्तं काव्यरूपाया वाचः पद्मासनत्वाप्रसिद्धा वदनांबुरुहे सादरसंगतत्वापत्तेः
अधिष्ठात्रधिष्ठानयोरभेदाध्यारोपात्तु देवतापरत्वेपि नानुपपत्तिः प्रस्तुतभावध्वनित्वसंगतिरेव प्रयुज्यते च तथोपचारेणाशत
शः कवयो वाग्देवी वदनांबुजे वसतीति चेत्को नाम दीनो जन इत्यादौ त्वलमप्रासंगिकविचारेणेति अत्र च हंसतीवेत्युत्प्रेक्षया चमत्कारैकका
रणत्वांशालाभः अमदिवेत्युत्प्रेक्षया जगतो नवनवत्वलाभः कविवदनेत्यादिनात्र जलजसदृशालाभ इति बोध्यं । इत्यु
त्प्रेक्षया व्यतिरेक इतिवज्जातमभिप्रायमेकवचनं हंसतीवामदिवेति द्वाभ्यामुत्प्रेक्षाभ्यां व्याप्त तन्निर्मितिव्यतिरेकयोर्भारतीतन्नि
र्माणयोर्व्यंजनादिति ६९ जलकेति कर्पूरमंजर्याख्ये नाटके कर्पूरमंजरीसमाख्याया नायिकाया इयमुक्तिः येलंकागिरिमेख
लासुस्खलिताः संभोगखिन्नोरगीस्फारोत्फुल्लफणावलीकवलने प्राप्ता दरिद्रत्वं तइदानीममलयानिला विरहिणीनिःश्वास

राम०
३६

संपर्किणो जात सहितिशिशुत्वेपि बहलास्तारुण्यपूर्णा इवोंतसंस्कृतं मेहलाहि इति पंचम्यंतपाठे मेखलाया इति येवाता लंका

गिरेः सुवेलस्य मेखलासु नितंबभागेषु स्खलिताः स्वभोक्तृसर्पत्रासात् संभोगेन खिन्नानां श्रांतानामुरगीणां स्फाराभिर्विस्तृता

भिः स्फुटाभिरूर्ध्वप्रसृताभिः फणानामावलीभिः पंक्तिभिः कवलने ग्रसने सति दरिद्रत्वं क्षीणत्वं प्राप्तास्ते मलयसंबंधान्म

लयानिला इदानीं विरहिणां प्राणिनः श्वाससंपर्किणो निःश्वासमिश्रिताः संतः शिशुत्वेपि ष्टी।। त्वेपि बहला बाढं स्थूलत्वयुक्तास्ता

रुण्येन पूर्णा इव जाता इति समुदितार्थः लंकासन्निहितो गिरिर्लंकागिरिर्मलय इति चक्रवर्त्ती अत्र स्त्रीणामाहारहेतुगुण्येनो

रगीति स्त्रीनिर्देशः फणानां स्फाराः स्फुलत्वेन ग्रासस्य स्थूलत्वमज्यते अनिलानां सुवेलतो मलयागमने समुद्रलंघनात्खेदः सं

मलयसंबंधात् सौगंध्यं क्षीणत्वप्राप्त्या मांद्यं च ध्वन्यते ७० सहीति सखि विरच्यमानस्य मम धीरत्वेनाखवा संप्रियदर्शी

न विशंकं खलस्य गुणः सह हे सति तेनायस्तमिति सं हे सखि मम धीरत्वेन धैर्येण मानस्य आत्रवासं स्थिरो भव त्विसमाश्वासनं विर

चय्य कृत्वा प्रियदर्शनेन विशंकं खले व्याकुले खलस्य गुणः व्याकुलत्वस्य क्षणे उपचारात् कौतुकोत्तरलितः इति केचित् भावप्राधान्ये

उश०
३७

37

नविशंखलत्वक्षणो कौतुकोत्तरलताक्षणाइसविहलत्वरोतिपाठेविह्वलत्वक्षणाइत्यर्थः सहसेतितेनधैर्येणापसृतंसहसेति
सहसैवेत्यर्थइतिचेत्उदासः इतिशब्दोवाक्यसमापकोतेयोजनीयःस्मरे ७१ आर्द्राद्रेति आर्द्राईकरजरदनक्षतैस्तवलो
चनयोर्ममदत्तं एकांशुकंप्रसादःकोपेनपुनरिमेनाक्रांतेइतिसा किमितिकुपितेलोचनेवहसीति एवंतत्परनायिकानखक्षता
दिचिह्नंनायकंप्रतिनायिकायाउक्तिरियम् तवेसनेतरमंगेइतिशेषः तवांगेआर्द्रारणाईरत्ताईत्यर्थः करजानांनखानांर
दनानांदंतानांचक्षतैःपरनायिकाकृतैर्ममलोचनयोरेकांशुकंरक्तोअंशावएवरक्तांशुकंरक्तवस्त्रंप्रसादोदत्तःकोपेनपुनरि
मेलोचनेनाक्रांतइत्यर्थः सवायमुक्तरूपस्यनायकस्यमर्मस्पर्शीनायकोत्तररूपत्वाउत्तरालंकारः ७२ महिलेति महिलासह
स्त्रभरितेतवहृदयेसुभगसाअमांती दिवसमनन्यकर्माअंगंतन्वपितनयति विरहकृशांनायिकांनायकायावेदयंत्याःस
ख्याउक्तिरियंहेसुभगसौभाग्ययुक्तमहिलानांस्त्रीणांसहस्रैर्भरितेव्याप्तेतवहृदयेअमांतीअवकाशमलभमानासानायि
कादिवसमभिव्याप्यअनन्यत्कर्मकर्तव्यंयस्यास्तथाभूतातनुकृशमप्यंगंतनयतितनूकरोतीत्यर्थः अत्रसुभगेसनेननना

एस०
३७

यिकायाएवानुरागविषयस्त्वं नतुसातवेतिध्वमते ७३ अतंद्रेति अत्रप्रकृतारूपामारात्रिः कंजनंसानंदंनकरोसपितुसर्व
मितिसंबंधः कीदृशी॰ नविद्यतेतंद्राआलस्यंयस्याःसावतंद्रामेघाघनाहततयास्फुरद्रूपश्चंद्रश्चंद्रमाआभरणंवभूषणंयस्याः
सातथाभूता॰ अतएवसम्यगुद्दीपितोमन्मथोययासातादृशी॰ तारकानक्षत्राणितरलानिचचलानियस्याःसातथेति॰ अत्र
व्यंजनयारूपामाषोडशवार्षिकत्वादिविशिष्टनायिकाविशेषःकंजनसानंदंनकरोतीति॰ कीदृशीअतंद्रोऽनलसश्चंद्रः कर्पूर
माभरणंयस्यास्तथाभूता॰ चंद्रःशिरोभूषणविशेषइतिकेचित्॰ समुत्॰ मुदाहर्षेणसहिता॰ दीपितोदीप्तिंप्रापितोमन्मथो
यया॰ तारकाअक्षिणीतीनिकातरलायस्याःसातथा॰ तारकावत्तरलोहारमध्यमणिर्वायस्याइतिमतीतोस्त्रीविशेषएवंरात्रि
रूपमाप्रतीतिः॰ चंद्रपदस्यपरिहृत्यसहतयासमुद्दीपितेत्यादेश्चतस्रहनयोभयत्रशक्तिमूलत्वम् ७४ यस्येति यस्यपुरुष
स्यमित्राणिमित्राणिआप्तास्तानिविश्वासपात्राणीसर्पःशत्रवःशत्रवःनिःशेषतोयंत्रणीयादमनीयाइत्यर्थः यस्येसनुषंग
रहोत्ररत्नचबोधः अनुकंपादयातद्योग्यःअनुकंप्यश्चस्नेहपात्रेचसजातःशोभनजन्मासचसएवजीवतिश्लाघ्यजीवनवानि

सर्थः अत्रोक्तार्थांतरसंक्रमितवाच्यैर्मित्रादिशब्दैर्यावज्जीवस्थायित्वरूपतदतिशयव्यंजनद्वारानायकस्यास्थिरप्रकृतित्वं प्रसेकं व्यज्यते
। त्वामसगन्नेतुतस्माद्त्रसावधानेनभाव्यमितिपदसमुदायरूपवाक्यव्यंग्याभिप्रायमितिभेदः ७५ खलेति खलव्यवहारा दृश्यंते दारु
णायद्यपितथापिधीराणां हृदयवयस्यबहुमतानखलुव्यवसायाविमुंचंति यद्यपिखलानां दुष्टानांव्यवहाराःदारुणाःदृष्टप्रति
बंधकाः दृश्यंतेतथापिसदर्थग्राहितयाहृदयरूपेणवयस्येनमित्रेणबहुमताअनुमोदिताःधीराणांव्यवसायाउद्योगानविमुंचं
तिनप्रतिबद्धाभवंतीसर्थः अथवाखलप्रतारणयास्वार्थसाधनेननिसंवदंतीत्यर्थः अत्रोक्तार्थेलाक्षणिकस्यविमुंचंतीत्य
स्येष्टकारित्वंव्यंग्यं ७६ लावण्यमिति कस्यचिद्विरहिणउक्तिः ततअनुभवेकागोचरंलावण्यं मुक्ताफलेषुछायायास्तरलत्वमि
वांतराप्रतिभातियदंगेषुतल्लावण्यमितीर्यतइत्युक्तलक्षणं कांतिरुज्वलता असावितिपूर्ववत् एवमग्रेपि रूपंसंस्थानसौष्ठवं
वचसःक्रमःपरिपाटी सकलमिदंतदाअनुभवकालेसुधायाअमृतस्यास्पदंस्थानमभवत्सर्वांगीणसौहित्यसंपादकत्वात् अ
धुनाविषोगकालेस्मर्यमाणमिनिशेषःमहान्ज्वरइज्वरःसर्वांगीणतायहेनुत्वादीसर्थः लावण्यसर्वावयवगतोविशेषःप्रसेकावय

वसंस्थानसौभाग्यंकांतिः रूपंवर्णविशेष इतिचंडीदासः अत्रतदादिभिर्विशिष्टावचनान्नहि तयालावण्यादिगतलोकोत्तरत्वप्रति
पादनद्वाराविप्रलंभाभिव्यक्तिः ७८ मुग्धइति सख्यामानशिक्षयं सादरमुक्तिः हेमुग्धेउपदेशग्रहणादनभिज्ञे अविलोः तीतो
वर्त्तमानोभविष्यंश्च कालोमुग्धतयैववयसोचितानाचरणेनैव नेतुपापयितुंकिंकिमितिआरभ्यते तर्हिकिमाचरितुंयुक्तं तत्रा
ह मानंधृतवधारय धृतिंधैर्यंवधानगृहाणाः वंधनोतयाअनपते यताध्वन्यते प्रेयसीतिप्रियविषये एतद्वैवाक्यचतुष्ट
येप्यन्वेति ऋजुतांसरलतांहरोकुरुसजेस्मेवंसख्याप्रतिवोधितानापिकाभीतंभययुक्तमाननंयस्यास्तथाभूतासतीतांप्रति
वोयंतीसखीप्रतिप्रतिवचः प्रत्युत्तरमाहे सन्वयधयंकार्यंसशेषवैवर्ण्यादेरानननगतत्वात्तत्रभीतत्वोपचारः नीचैरिमाफत्तरं
हेसखिविनीचैर्मंदंशंसकथय हियस्मात्ममप्तहृदिहृदयेस्थितोविद्यमानः प्राणेश्वरः प्राणानांतद्रायत्तत्वाज्जीवितसर्वस्वाय
मानःकांतःश्रोष्यतिननुशंकायां प्रतिवर्शितायांप्रतिवोधितामुअर्वोधिता प्रतिवचः प्रतिकूलंवचइतिचक्रवर्त्ती वचोवचः
प्रतीतितुनयुक्तोर्थः सवंप्रतिवोधितेस्यस्यासंगतेः प्रतिवोध्यमानेतिहितदोचितं अत्रनीचैःशंसनविधानस्यानाहार्यत्वरूप

उदा॰
३९
39

युक्तं तं प्रकाशयन्दीनां ननापदं रागस्याकृत्रिमतया संभोगप्रकर्षे पर्यवस्यति॰ सख्या अपरिहार्यवचनतया वनीचैरिति विधिर्न तु मा
यां सेति निषेध इति हेयं॰ एवं त्र विप्रलंभ इह संभोग इति भेदः ७८ रुधिरेति हे भीम भयंकर नृपत्वं विभासि शोभसे इत्यन्वयः पक्षे भीम
भीमसेनो संबोध्यः कीदृशः रुधिरस्य विसरो राशिस्तेन प्रसाधितो भूषितः करालो भीषणो यः करवालः खड्गस्तेन रुचिरो मनोज्ञो भुजरूपः
परिघोऽर्गला यस्य तादृशः जयश्रीनिरोधकत्वादर्गलात्वोक्तिः मित्रशत्रुभेदेन करालत्वरुचिरत्वे वोध्ये पुनः कीदृक् स्फुटितिभ्रुकुट्या
भ्रूभंगेन विटंकितस्तदाकारे स्वाभ्वितत्वात्संजातविठंको ललाटमेव विशालतया पट्टो यस्य सः कपोतपालिकायां तु विठंकं पुंनपुंस
कमिति समरः भ्रुकुट्या विटंकितो ललाटपट्टो यस्येत्यर्थ इति केचित्॰ ७९ मुक्तीति जनांतरसन्निधावुपनायकोस्यितेः प्रस्तुतने
हे प्रशंसाव्याजेन तदागमनाधीनं हर्षं व्यंजयंत्या नायिकाया इयमुक्तिः संध्या सा वागमो थवेदः कस्मान्नेदनिष्यंदं इत्यानंदप्रवाहं न वि
दधाति करोति अपितु सर्वमिति सन्वयः कीदृक्॰ भुक्तिं स्वर्गादिभोगं मुक्तिं च निःश्रेयसं करोतीति तथा स्मृतः कर्मकांडवेदांताभ्यामुभ
योयायाना वोधनात्॰ एकांतेन नियमेन सम्यग्गादेशानेहितोपदेशोतसरः अप्रतारकत्वादिति वानयोरर्थः मुख्यतया तु विवक्षितो गोपनाया

रमा॰
३९

प्राकरणिकीकृतोभ्युपाय यथा॰ सतः सुंदरस्य नायकस्यागमस्यागमनं कस्य नायिकाजनस्यानंदनिष्पंदनं विदधाति॰ कीदृशः भुक्ति
संभोगः भुक्तिविरहाविडुः रवन्यागः तौ करोतीति तथा॰ एकांतस्य संकेतस्थानस्य समादेशनेतसर इति॰ पूर्वं चोपमाध्वनौ भीमपदस्येहोक्त
वस्तुध्वनौ प्रधानभूतस्य सदागमपदस्य परिहृतस्य सहत्वाच्छ् दृशक्तिमूलत्वं हेयम्॰ साधयमिति उपपतिं संभुज्यतज्जनितश्रमापनयना
य स्नानादिकृतवती सखीं प्रति ज्ञातरहस्यायाः सख्या इयमुक्तिः हे सखि तव सौकुमार्यमाश्चर्यं येन कारणेनाधुना श्रमनिवर्त्तकस्नाना
दिसमवधानेऽदशायां भ्रमितः समंततः बहिरंतश्च क्लांतासि श्रांतासि॰ कथं तत्राह॰ नेत्रे व्यादिः॰ तेतवनेत्रयोर्द्वंद्वयुग्मं न विघृतमीलनस्य
व्यतिकरः पौनःपुन्यं यत्र तथा श्रासितुस्यानुं न शक्नोति॰ तथा च मीलनपौनःपुन्यं सर्वांगीणाश्रमं गमयतीति भावः॰ आश्चर्यं कुतस्तत्रा
ह सायमित्यादि। सायंकाले स्नानमुपासितं श्रमापनोदसमर्थं यथा स्यात्तथा कृतमलये जातेन चंदनेनांगं समग्रासमंतात् लेपितं॰ च
वरस्याकाशस्य मणिरिव मणिः सूर्यः अस्ताचलस्य चूलमस्तकं याति अस्तंगतः इत्यर्थः तेनातपादिजनितत्वसंभावनानि हन्तिः॰ अत्र म
न्यविधे विस्त्रब्धं निःशंकं मंथरं वा आगतिरागमनं॰ एतेन भयत्वराहेतुकत्वं हतमस्य नास्तीत्युक्तं॰ यत्तु श्रमायनयनव्याजे। नस्यागमभिस

रणार्थंप्रसाधयंतींसर्वांप्रति नायिकोक्तिरियमिसवतार्यनेत्रद्वंद्वेत्यादेः स्वछंदमसंबद्धव्याख्यापूर्वकंकृतः परपुरुषेणापरिचयः संकेतोययेनि
प्रकाशव्याख्यानेपूर्वव्याख्यायांचास्मरानार्जवाभ्द्रावनंतभ्रांतिविलसितंवदनेनकल्पनोत्कलिकाविजृंभितमित्युपेक्षणीयम् ८१ तद
प्राप्तीति विष्णुपुराणागतमेतत्पद्यद्वयम्· स्वर्वोक्ताभ्योमागोपस्कन्यकानिर्गत उछ्वासः प्राणोत्क्रमणाय यस्याः सातथाभूता तस्याभा
वस्तत्वातयाप्राणोत्क्रमणाविनेत्यर्थः न तस्यप्राणा उत्क्रामंती हैवसमवनीयंत इति श्रुतेःमुक्तिंगता· भावनयातद्रूपतांप्राप्तेत्यन्वयः
कीदृशी· तस्यकृष्णस्याप्राप्त्याविपोगेनयन्महादुःखंतेनविलीनानिनष्टान्यशेषाणिसमग्राणिपातकानियस्याःसाताहृशी· तथात
स्यचिंतयाध्यानेनयोविपुलोमहानाल्हादस्त्वानंदस्तेनक्षीणाः पुण्यसचयः समूहोयस्याः सातथाभूता· पापपुण्ययोः फलना
श्यत्वात्·पुनः कीदृक्·जगतः सूतिउत्पत्तिर्यस्मात्तादृशंश्रीकृष्णंपरब्रह्मस्वरूपिणंसच्चिदानंदस्वरूपंचिंतयंतीभावयंतीति· अत्रकृष्ण
वियोगदुःखचिंताल्हादयोरशेषपापपुण्यफलत्वेनाध्यवसिततयोरवगातिरिसातिशयोक्तेर्व्यंग्यत्वम् ८२ स्मरादेति वर्ततेतिखेदेविस्मये
वातवेतिहर्षकर्मणिषष्ठी· भोवीरतवत्वांद्विषतांत्वयिपराङ्मुखेप्रतिकूलेसतिसर्वंपराङ्मुखंविपरीतंजातमितिशेषः एतदेवोपपादयतिस्मरण

देत्यादिना। स्मरणादारात्रिः। अस्मरणादारात्रिर्भिन्नाव नं वनमित्यंत्यसनं घृतादितमिन्निमिसे वं शरद्शक्तिमलाव्यं जनागम्यविरोधालंकरिशां
सर्वपराअ्युरवत्वोपपत्तिः। विरोधपरिहारस्तु। स्मरणामुसवं ददातीति तथा। पश्चान्नञ्समासेन तमिन्नारात्रिः वनमवनं रसकं। अवीना
मेषाणां अवनं मेरणां तदेवसनमिति रीसावोध्यः ८३ तुहेति सीसम्मीतिमभातेदेशीः प्राकृते लिंगानियमाद्दलपदे पुंस्त्वम् तवव
ल्लभस्यप्रातरासीदधरो म्लानकमलदलं रतिनववधूः कृत्वा करोतिवदनं महीसंमुखमिति सं। रात्रौ वव्यतातुंवितदयिताधरां च धूम्र
तिकुस्मास्युरुक्तिः तववल्लभस्य दयितस्य प्रातः काले अधरो म्लानं च तत्कमलस्य दलं तद्रूप आसीदिति सखीवचनं श्रुत्वा नवातरु
णीवधूर्वदनं मुखं मस्या भूमेः संमुखं अधोमुखमिति यावत् करोतीत्यन्वयः। वर्त्तमाननिर्देशाल्लज्जया अविरामः सूच्यते। ८४ राईस्वि
ति रात्रिषु वंऽधवलासु ललितमास्फालयश्चायं एकछत्रमिव करोति त्रिभुवनराज्यं विजृंभमाण इति सं। यः प्रकरणात्कामः चंद्रेण ध
वलासु रात्रिषु ज्योत्स्नौघितियावत् ललितं सुकुमारमनोहरं न जरठं आस्फाल्येव त्रिभुवनानां राज्यमेकमेकमेवछत्रं यत्र तथाभूतं अद्विती
यमितियावन्न करोति। अत एवविजृंभमाणो विस्फुरमाणो इत्यर्थः ८५ निद्धितेति। अनंगः अशेष सकलकामिहिंस्त तया कुटिलेवयसि योव

नेसतिसुदृशः शोभननयनायाः कामिन्याद्दशिदृष्टो निशिताः तीक्ष्णाश्चते शराश्चतेषांधिपाश्चयंममनिशितः शररतिवु ध्यास्वस
बलमर्पयतिसाचार्पितवलाद्दृष्टिर्यत्रपैस्यांदिङ्गिलक्षणायातस्मां बंधिनियुवजनेननिपततितत्रावस्याहसितस्मदितमम्बुर्नाद्दयो
ऽतिकरणमिश्रणामेसप्राप्यसमुन्मिषंसुभ्रवंतीसन्वयः ८६ हारिञ्जतोऽति वार्यमाणोपिपुनःसंतापकदर्थितेनत्वद्दयेनस्त
नभरावयस्यत्वेनविशुद्धजातिर्नचलसस्याहारइतिसं·विरहजनितेनसंतापेनकदर्थितेवपीडितेनत्वद्दयेनपुनःपुनर्वार्यमाणोऽप्य
स्याःप्रकृतनायिकायाहारस्तनभरस्यवयस्यत्वेनसख्येननचलतियतोविशुद्धजातिर्निर्दुष्टमुक्ताजातिमानन्येत्वेवेणाविशुद्धजन्माव
विशुद्धजातयोहिनकदापिस्वस्यानाञ्चलंतीत्यर्थः अत्रचव्यापमनवरतंकंपनंश्वासोच्छ्वासाधिक्येनत्वद्दयकंपेनप्रयुक्तंवेदितव्यम् के
चित्तुआलिंगनांतरायतयासंतापकदर्थितेनस्तनभरस्यहारेणासहालिंगनेपीडानिवर्त्तकतयावयस्येनत्वद्दयेनेतिविपरीतरतावस्थाव
र्णनपरतयायोजयंति ८७ सोमुद्धेति समुग्धश्यामलांगोधम्मिलः कलितलालितनिजदेहःतस्याःस्कंधाद्दूलंगहीत्वास्मरःसुरत
संगरेजयति सःधम्मिलःकेशपाशएवस्मरःकामस्तस्यानायिकायास्कंधोंसएवस्कंधःसेनानिवेशस्तस्मात्बलंसामर्थ्यमेववलंसैन्यमगृ

वित्मास्य स्वरूपं गुरुत्वकः गुरुरिति हेतोः पातयित्वा विभिन्नो विभेदित इत्यर्थः स्वतन्त्रेणापर्यत्वात्. नायं हारस्पर्शात् घटनाशः किंतु गुरुतयाप
रणीउक्तत्वात् घटेनैव स्वात्माविनेदित इत्यस्य यन्त्रूतिः दिष्टो इति पाठे तु भास्करेणार्थ उक्तो यथा विश्रंखलंभियं दृष्ट्वा कुठेन घटेनोपलक्षिता त्व
तरलतरदृष्टिर्जातेति शेष इत्येकं वाक्यं. द्वितीयवाक्ये विभिन्न इत्यनंतरं त्वयेति शेष इति १ जोह्नाए इति ज्योत्स्नया मधुरसेन च वितीर्ण
तारुण्यपोऽसुकमनाः सा। हृद्रूपि नवोढेव परवधूरहह हरति तव हृदयम् गतयोवनाम्य नायिका प्रसक्तं स्वामिनमुपहसं सा नायिका या इय
मुक्तिः अहह खेदे दृष्ट्वापि सा नायिका ज्योत्स्नया मधुनो मधस्मरसेन आस्वादेन च वितीर्णा दत्तं यत्तारुण्यं तेनोत्सुकं स्वर्थां द्रुतमनोपसा स्तथा
भूता सती नवोढेव तव हृदयं हरति यतः परवधूः परनायिकात्वेनैव तत्र चित्रं हरति न तु सौंदर्यादिनिमित्ते नरमन्यस्तीति भावः तदेतत्काव्य
लिंगं. ज्योत्स्नामधुरसाभ्यां दत्तं तारुण्यं पत्हृदयहरणो हेतुरिति काव्यलिंगमिति चक्रवर्तिनः आक्षेपे परवधूत्वस्य श्लाघा मेनम योजकत्वान्न
स्य श्लाधा मं २ खलमिति भावतेशातियवीराम्व तं बालं संध्यासमये स्मशाने समानीतं दृष्ट्वा शिवसेसमर्थ सरात्रावेष समन्भ स्तद्दं
ध्वनि सर्जनार्थमुक्तिः हे जनाः अस्मिन्न्श्मशाने स्थित्वा ऽलेपर्यंतो कीदृश ओदम्रेमां सारैपक्षिविड़ोषगोमायुभिः मंगाले च संकुले वा

मे· तथाकं कालानि अस्थीनि वहलानि यत्रैवंभूते घोरे दारुणे अत एव सर्वेषां प्राणिनां भयंकरे आसज्जनके तथा च प्रयोजनाभावे एवंविधे स्थ
ले स्थितिरनुचितेत्यर्थः। ननु मन नस्यापि पुनरुज्जीवनं संभाव्यत इत्यत आह हंन चेहेनिरूह संसारे कालधर्ममरणमुपागतः प्राप्तः प्रियो वा
द्वेष्यः शत्रुर्वा कश्चित् उदासीनोऽपि वा जीवितः तथा चैवं दृष्ट संभावितमित्यर्थः समाधानायाह· प्राणिनां संसारिणां ईदृशी प्राणोत्क्रम
णरूपा गतिः स्वभावः एवं च स्वभावस्य दुरतिक्रमत्वान्मोहो न कार्य इति भावः ३ आदिसोपमिति हे मूढमनः सर्वात्रपमादिसः सूर्य
स्थितः अस्तीति शेषः तथा च रात्रिंचरेभ्यो भयमधुना नास्तीति भावः अतः सांप्रतमधुना स्नेहं सविधस्थितिरूपं कुरुत· स्नेहं जीवनो
पायानुष्ठानलक्षणमिनिदीपिकायां मत तस्य जीवनासंभवाद् फलमवस्थानमिसाशंक्याह बहुविघ्न इत्यादि· अयं संध्यात्मको मु
हूर्त्तः बहुविघ्नः राक्षसवेलात्वात् भूतावेशादिरूपविघ्नबहुलः तथा चैतन्मुहूर्त्तोपगमे तद्विघ्नोपशान्तो कदाचन जीवेदयमिति संभावना
यामपि शाहूः एवं जीवनसंभावनामुत्पाद्य मोहयितुमाहामुष्मिति· हे मूढाः गृध्रस्य वाक्यात् सर्वे ज्ञानस्य विशंकिताः कथमकस्मात्त्याजेश
यं बाल इति विचाररहिताः विश्वस्ता वा अमुं बालं कथं त्यजध्वमित्यार्षमात्मनेपदं· कीदृशं बालं· कनकवर्णावराभायस्य तथाभूतं तं न तु क

हीत्वासुरतरूपेसंगेसंग्रामेजयतिउत्कृष्टोभवति·कीदृशः सुग्धंसुंदरंश्यामलमंगंयस्यसतथा·कलितःपुनराप्सादितोललितोमनोह
रोनिजदेहोधम्मिल्लरूपोयेनेतथाभूतश्चैवेसुतेसागर्भम· अत्रधम्मिल्लस्यस्कंधसंबंधेनशोभातिशयलाभात्तसदृशाधाम्नं ८८
गावेति नवपूर्णिमामृगांकस्यसुभगकस्त्वमसिभणाममसतं कासौभाग्यसमग्राप्रदोषरजनीवतवाद्य खंडितायाःस्वामिनं
प्रतीयमुक्तिः हेसुभगत्वंनवस्यप्रथमोदितस्यपूर्णिमासंबधिनोमृगांकस्यचंद्रस्यसंबंधीकः आनासरवावाञ्च सिएतन्ममसत्यंभण
वद·तत्संबंधित्वंविनाक्षणिकानुरागित्वस्यतेस्वभावस्यात्वप्यनुपपत्तेरितिभावः तथाचंद्रस्यप्रदोषरजनीवतवकानायिकासौ
भाग्यंनायकानुरागादिसमग्रंयस्यांसातथाभूतेसर्थः प्रदोषोरजनीमुखमितिसमरः अत्रनवेसनेनक्षणिकानुरागित्वलाभः पूर्णि
मामृगांकेसनेननायिकांतरसंसर्गित्वंव्यज्यते·एवंप्रदोषसजेनप्रकृष्टदोषवत्वंरजनीत्वनेनरागित्वमितित्र्येयम्·केचित्तुनवः
प्रतिपदुदितरस्सर्थमाहुः ८९ सहीति सखिनवनिधुवनसमरे·कपालीसख्यानिबिडया हारोनिवारितएवोछिद्यमाणस्ततः
कथंरमितंमितिसं· सख्याइयमुक्तिः हेसखिनवंकृतंनंनिधुवनंसुरतमेवसमरः संग्रामस्तस्मिन्ननिबिडयादृढयाविश्वस्तयाचं·चं

कपालीश्चालिंगनंतद्रूपपासुखहेतुत्वात्तसख्या उत्क्षिप्यमाणः हृद्योत्तृतीयतयाऽधिकोभवन्हारोनिवारितएव । गाढालिंगनेनत्रो
टितस्तस्यैषः ततोहारच्छेदानंतरंकथंरमितंक्रीडितमितिप्रश्नः । नवैलक्षण्यस्यवनाद्यतिरेकलाभः उच्छेरंतोइतिपाठेतदर्थोदर्शितः
उच्चैरंतोइतिपाठेउच्चारान् । ऊर्ध्वंवलन्निस्यैषः उद्वेरंतोइतिपाठेउद्गृणवन्तउत्कार्यंगोक्षिपतइतिहारइत्यन्वयेनतामागच्छन्नितिचक्रवर्ती ।
उद्वेश्रंतोउद्विजमानइतिचंडीदासः । श्वंकपालीपरीरंभेइतिमेदिनीकरः ९० प्रविसंतीति प्रविशंतीगृहद्वारंक्वचित्स्मितवदनाविनोक्य
यद्यानंस्कंधेगृहीत्वाघटंहाहानष्टइतिरोदिषिसखिकिमिति हेसखिगृहद्वारंप्रविशंतीत्वंविवेलितपरावृत्तवदनंयस्यास्तथाभूता
सतीपंथानंमार्गंविलोक्यस्कंधेघटंगृहीत्वाहाहानष्टइतिकिमितिरोदिषि । घटभंगस्यबुद्धिपूर्वकत्वेनरोदनहेतुत्वाभावादितिभावः
रोदनेननष्टंत्वंहेतल्लेकारः नाशेस्कंधग्रहणंहेतुरितिचक्रवर्ती । रोदनंवैयर्थ्यबोधनद्वारासमीहितसाधनानुमतिस्तुचनास्किन्निपरस्यसाधा
सर्वबोध्यम् १०० विह्वलेत्वलमिति विस्रंस्तवलांत्वांसखिदृष्ट्वाकुटेनतरलतरदृष्टिंद्वारस्यशंभिषेणाव्यात्मागुरुकइतियातयित्वाविभिन्नः
हेसखित्वांविस्रंस्तवलांआकुलांअतएवतरलतरेअतिशयेनतरलांचंचलांदृष्टिंयस्यास्तथाभूतांदृष्ट्वाकुटेनघटेनद्वारस्यशाखामिषेणव्याजेन

नकामं तदा कनकगतकाठिन्यस्यापि प्रसंगात्. तथा न मांस्यासादितं यौवनं येन तथाभूतमिति. अत्र बालत्वेन मन्मथकालाभावः क
नकेसनेन मन्मथस्तु विन्दत्वैव सर्पाभावः अप्राप्ते तु नेन पादाराभिगमनादिरहिसेनायुः सत्वं च स्त्यते. मठारसत्र बाला इति कचित्पाठः तत्रा
विवेकाद्रसर्पः ४ २ इति रतिकेलिहृतनिवसनकरकिसलयरुद्धनयनयुगलस्य रुद्रस्य तृतीयनयनं पार्वती परिचुंबितं जयति रुद्र
स्य महादेवस्य तृतीयं नयनं पार्वत्या परिचुंबितं सत् जयति सर्वोत्कृष्टं भवति. कीदृशस्य रुद्रस्य. रतिकेलौ सुरतक्रीडायां हृतं निवस
नं अम्बरं यत्र गौरीसंबंधि वासो येन सः तथा सौ करकिसलयाभ्यां करपल्लवाभ्यां रुद्धं पिहितं मर्यातं गौर्या नयनयोर्युगलं द्वंद्वं यस्य तथा
भूतश्चेति वक्त्री हिहूयानेतं कर्मधारयः रतिकेलिहृतनिवसनायाः करकिसलयाभ्यां मिसादिविग्रहे निवसने सत्र इस्वानुप
त्रेः तथा च कराद्वयस्य नेत्रद्वयपिधानव्यापृततया लौकिकचुंबनपिधानवत्रयात् तृतीयनयनस्योत्कृष्टत्वमुच्यमानं रागातिशयहर्ष
लज्जादिसंपत्तिमुखेन रसातिशयं पुष्णाति ५ प्रेयानिति सत्रायपामितिम ध्यमरणान्मायेनोभयत्र संबध्यते. सोयं परमप्रेमास्पदत्वे
न प्रसिद्धः प्रेयान् प्रियः शपथेन सहितं यथा स्यात्तथा पादयोः प्रणतः प्रणतः कांतया सत्रायपथमयाकृतो निराकृतः सन् उन्मना उत्सुक

उदा०
४४
44

मनाःसन्वासभवनाह्वासगृहान्रासेतिपाठेक्रीडागृहात्तद्विवारायेवनाधिकानिपदांनिनह्वाराणियावन्नयातितावत्धावित्वैवप्रस्तुतविपरी
तं कृतः प्रणामोपच्चतद्य यास्यान्· पूर्वंप्रणतस्यापाकरणमधुनाप्रणामपूर्वकंधरणमितिवैपरीत्यं· तथागलश्चासौनीवीनिबंधश्च सतथा·
पाणिसंपुटेप्रणामार्थंबद्धाञ्जलौगलन्नीवीनिबंधोयत्रतद्य यास्यान्नयाध्वतः राज्ञौत्कंठ्यात्स्खलतोनीवीबंधस्यप्रणामांजलिनैवा
लंबनं केचित्तुपाणिसंपुटेसारिधावनक्रियाविशेषणमित्याहुः· लसदितिपाठेत्वार्थिकंगलनं· अहोइतिविस्मये· गतिःस्वभावः अत्रप्रे
यान्कांतयेसतामप्रापरस्परविरहाक्षमत्वंध्वन्यते· क्वचित्स्यायमितिपाठः ६ पथीति पथिपथिमार्गेमार्गेअंकुराणामाभाकांतिः शुक
चंचूनामिवचारुर्मनोहरासीतिशेषःरंभेतिपाठेशुकचंचूवद्यारुणांरंभांकुराणांकदल्यंकुराणांलासकरमन्वयः पवमानोवायुर्दिशिदि
शिप्रतिदिशंवीरुधांलतानांलास्कोनर्तकश्चास्तीतिनूतनांकुरशोभाशालिवसंतं· सर्वदिक्संचारिमंदमारुतयोरुद्दीपकयोः संपत्तिरुक्ता·
तत्कार्यमाहनरीति· नशब्दस्यसमस्तरूपम्· पुष्पंधनुर्यस्यतथाभूतः कामोनारिनरिप्रतिमनुष्यंद्राकृशीघ्रंसायकान्पंचापिबाणान्किरति
विक्षिपति· एवंकामोद्दीपनेसतिपुरिपुरिनगर्यांनगर्यांमानिनीमांमानवतीनांमानस्यचर्चाप्रसंगः विनिहत्याविशेषेणनिहत्यसर्पः ७ लिख

राम०
४४

न्विति बङ्करिनमापिमानवंतीप्रतिसख्या इयमुक्तिः हे कठिने कठिनहृदये तव प्राणा इव दयितः प्रियः अवनतो नम्रो बहिः वास्यशालायां
भूमिं लिखन् भूमिमस्तदयतया विलिखन्नास्ते उपविष्टोस्ति॰ तथा सख्यः सर्वाः निर्गतः आहारोपि संतता भूताः संख्या सततं निरंतरं यद्रुदितं
रोदनं तेनोच्छूनेजानशोषिनपनेयासांतथाभूतासंततीतिशेषः तथा पंजरस्थैः शुकैः सर्वं हसितयुक्तं पठितं परित्यक्तेन वचे पमवस्था दृश्य
मानासंतक्षीणतराविशिष्यवकुम्भशक्याः तोधुनाईदृशातिशायेसति मानं विसृज सजे सन्वयः अत्र शुकेपि हास्यवर्णनं नाविरुद्धं
विहायसातेनविहस्य भयदसाहिनैषधर्दनादि साङ्कः ८ गामेति ग्रामरुहास्मि ग्राम एव सामि नगरं स्थितिं न जानामि नागरिकाणां
पतीन्हरामि या भवामि साभवामीति सं॰ एतच्च गामरुहम्मीति पाठे॰ गामारुहम्मीति पाठे ग्रामारुहास्मीति॰ गामारिअन्हीति पाठे ग्रा
मीणास्मीति ज्ञेयं॰ कलहेकात्वमसी सधिक्षिपती नागरिकस्त्रियं प्रति ग्रामस्त्रिया इयमुक्तिः ग्रामरुहा ग्रामजाता वसामि॰ निवसा
मि॰ नगरस्य स्थितिर्मर्यादा वैदग्ध्यरूपा॰ नागरिकाणामिसनादरे षष्ठी तथा च नगरे भवा नागरिकास्तनादृत्य तासां पतीन्हरामि व
शीकरोमी सर्थः पतिकर्तृकेषिता सामनादरेण तस्याः प्रयोजककर्तृत्वमवसेयं॰ यद्यपि षष्ठी चानादरे इत्यनुशासनाद्वाच्यं एवम्सः तथा

उदा. ४५

45

पितह्योधनहारागर्वरूपव्यभिचारिभावव्यंजकत्वं विवक्षितमस्त्यतमेव। अतएव पद्यैकदेशोसाद्दौरसाद्यरसेवोक्तं। एवंसर्वत्रैवंविधस्थले
रस्थत्वमितिदिक् ९ नारोति तेषांगुणग्रहणानां तासामुत्कंठानां तस्य प्रेमगः तेषांभणितानांसुंदरदृशंजातमवसानं। एतत्त्वएरिसि
त्वमितियाठे ईरिसित्वमितिपाठेतु ईर्षितमितिज्ञेयं। सापराधंदयितंप्रतिकुपितायाश्यमुक्तिः हे सुंदर तेषांविशिष्टानि वांच्यानांना
विधानांगुणग्रहणानांगुणवर्णनानांतासांममसांनिध्येउत्कंठानांतस्यप्रेम्णः तेषांभणितानांत्वमेवजीवितसर्वस्वमिसाहिवचना
नांईदृशमेवंविधापराधकलुषितमवसानं पर्यवसानंजातमित्यन्वयः ईर्षितंसंजातेर्ष्यमितिपाठांतरेर्थः प्रकारोवडूत्वं। वहुविधत्वं।
एकत्वमेकरूपत्वं। सततमविच्छेदेनप्रकर्षनिकर्षराहित्यं सास्यरमोत्कृष्टत्वलक्षणामिति १० रेरेइति। श्रांतस्यस्वचित्तंप्रतिसाक्षेपसं
बोधनमिदं चंचललोचनायांमंचितागमिताः चिरमभिलाषोयेनतथाभूतेतिचेतोविशेषणं। चंचलाभ्यांलोचनाभ्यामंचिताश्चाविष्कृताः
चिरयांत्नायिकायामस्पृतिचंद्रीदासः रेचेतः एणनयनाहरिणाक्षीमालोक्यस्थिरंप्रेममयंचतादृशंमहिमानमाहात्म्यंस्फुरतारूपंप्रमुच्य
सत्काकिंकस्मात्त्वंसमिनत्रकवडूर्षाउद्दोलंभवसीत्यर्थः हेतुमाशंक्यनिराकर्तुमाह किंममसेविहरिष्यामीत्यर्थः प्रहा

राम० ४५

सेचमन्मोपपदेमन्यतेरुत्तमएकवच्चेसतनुशासनान्मध्यमोत्तमयोर्व्यत्ययः वतखेदेहतांनिंहितांइमामंतर्विघमानांआशांमुंचसजंखलुयतः
एषाउपदर्शिताआशा·स्त्रीतिकश्चित्‌संसारएववारांनिधिःसमुद्रस्तस्मिन्‌ कठतलेकृताबद्धाशिला·मज्जनेहेतुत्वात्तद्रूपाभवतीति
शेषः इस्यंच परिणामविरसत्वाद्दूषीनयुक्तइतिभावः अत्रममरतिपुरुषव्यत्ययेनप्रहासोव्यज्यते ११ येषामिति येषांपुंसांदोर्बलमे
ववाहुबलमेव· एवकारेणनीतिबलव्यवच्छेदः तेराजानोदुर्बलतयानिर्बलत्वेनसम्मताः।नीतिज्ञानांहृद्यानामितिशेषः तेदोर्ब
लमात्रशरणाः केवलनीतिरीतिशरणोश्चोंञ्चीश्वरैः एष्वीश्वरैः प्रायश्चकिंकार्यंनकिमपीत्यर्थः समुच्चयार्थकस्यापिशब्दस्यभिन्नक्रमं
तयायोजनात्‌·नीतिर्नीतिशास्त्रंतदुक्तः त्रिप्रकारोरीतिः हेदस्माशक्रएवधीद्वयेपुनःपराक्रमनययोःस्वीकारेणकांतोरमणीयः क्रमोव्यव
सायोयेषांतथाविधास्तेत्रिजगतिभुवनत्रयेपिनेवस्कनेस्युरेवयदियास्युस्तदापरंकेवलंभवन्तुत्याः पवित्राह्विज्ञानवहवइस्यर्थः अत्रपरा
क्रमपदस्यएवनिपातस्तदर्थस्याभ्यर्हितत्वंगमयति १२ मधनेति हेवीरधनुषोध्वनिंटंकाररूपंविभर्त्तीतिधनुर्ध्वनिभृत्‌तत्यामृतेमध
नंयुद्धमेव वेशनिःसरणहेतुत्वाद्‌ध्वामार्गस्तस्मिन्‌तवविधुरैः शत्रुभिर्दिवसंव्याप्यायोधियुद्धमकारिहेनरपनरान्‌पातिरक्षतीतितत्यामृतम

उदा॰
४६

वांस्तद्दिवसेनविधिनाविधानेनसिद्धस्यनतुकृत्रिमस्यसाधुवादस्यकीर्त्तेःपदंस्थानंयथास्यात्तथाश्वयुद्धयुद्धंकृतवानित्यर्थः अत्रदिवसेने
तित्ततीयावगतोयुद्धक्रियासमाप्तिरूपोपवर्गोयुद्धफलस्यविजयस्यप्राप्तिंद्योतयति॰ क्रियायाःफलापवर्गित्वादितिबोध्यं १३ भूयोभूय
इति मालतीमाधवेकथितंचनोमालतीधात्रेय्यालवंगिकयेतिचूर्णिकामुपक्रम्यकामंदकीवचनमिदं॰ यत्मालतीगाटयाद्दट्याउत्कंठ
याश्रोत्सुक्येनलुलितैर्म्लानैःसम्भिर्लंलितैर्मनोहरैरंगकैस्ताम्यतिग्लायतीत्तिमालत्याधात्रीपुत्र्यालवंगिकयाकथितमितिचूर्णिकावा
क्येनान्वयःकिंकृत्वा॰ भूयोभूयोवारंवारंसविधयानिकटस्ययानगरीसंबंधिन्यारथ्यपाराजमार्गेणापर्यटंतंगच्छंतंनवंयुवानंमाधवंरतिःका
ममिवसाक्षात्ननतुचित्रादौदृष्ट्वादृष्ट्वापुनःपुनरवलोक्यतेनरागोत्कर्षलाभः॰ किंभूतामालतीभवनस्यवासगृहस्यसंबंधिनीयावलभी
उपरितनमंडपस्तदीयेतुंगेउच्चैर्वातायनेगवाक्षेतिष्ठतीतितथाभूता॰ नतुरथ्यासंलग्नगृहांतरवलभीवातायनस्थातत्रस्थितापश्यतिननुते
न॰ पश्यंतीमामयंपश्येदितिशंकयावातायनेशरीरस्यानर्पणात्॰ ललितललितैरितिपाठे॰ तिमनोरमैरित्यर्थः अत्राक्रमस्यप्रतिपाद्यानुकं
याभंग्येनसौकुमार्येणादुःखासहिष्णुत्वाभिव्यक्तिद्वाराविप्रलंभोत्कर्षः १४ परिछेदेति तत्रैवमकरंदंप्रतिमाधवस्यस्वावस्थाकथनमेतत्तम

राम॰
४६

मक्कोपिविकार१४ अंतः अंतःकरणं जडयति स्तंभयति स्तंभयति विषयाग्राहकं करोतीति यावत् न अतयाता पं विरहसंतापं चकुरुत इस
न्वयः कथंभूतः परिच्छेद इयत्ता विराम्रो वा तमतीतोऽतीतोति क्रांतस्तद्रहित इत्यर्थः तया सकलानां चाकलासारिकव्यंजकानां वचनानां
शक्तानामविषयः अकमालस्मणयाभ्यंजनयापि वा प्रतिपादयितुमशक्यत्वात् पुनः शब्दोत्रकालांतरमात्रेन त्वा हत्त्वो तस्मा श्रो
त्रकालिकपदार्थाश्रितत्वात् तथा च यो विकारोऽस्मिन् जन्मनि पुनरस्मदाऽनुभवपथं अनुभवगोचरत्वं न गतवानित्यर्थः पुनरि
तितर्थेः अस्मिन् जन्मनित्वनुभवपथं न गतवानित्यर्थ इति केचित् पुनः कीदृक् विवेकस्य गुणदोषविषयस्य प्रध्वंसो नाशो न
उपचितेन प्ररूढेन महता मोहेन विपरीतज्ञानेन गहनो व्याप्तस्तत्सर्थः अत्र प्रशब्देन समूलोन्मूलनलक्षणः प्रकर्षस्तद्द्वारा वा मोहप्रक
र्षो व्यज्यते तेन रागातिशयस्तेन च विभ्रमेण भातिशय इति ज्ञेयं १५ कृतं चेति नृपं प्रति मंत्रिणा उक्तिः हे राजन् त्वया मनः गर्वस्याभिमुखं
न तु गर्वितं कृतं वक्ति मन्मन्सहृदयेप्सितमिति शेषः एवं शास्त्रप्रयोगादि किं विना नोऽस्माकं द्विषः शत्रवो निहता अधुना तु निहनिष्यंते दृष्टांतमाह
तमांसीति अंशुमान्सूर्यो यावदुदयाद्रेर्मौलिं शिरोऽलंकारतां नायाति तावदेव तमांसि निष्ठंति तस्मिंस्तु तथाभूते न निष्ठंतीति वैधर्म्येण

उरा॰
४७
47

दृष्टांतः अत्र चकाराभ्यां स्वसमभिव्याहृतक्रिययोस्तुल्यकालताद्युपः समुच्चयस्तन्न हारावावीरप्रकर्षोद्यमते १९ रामोप्यावितिं राघवोनंदो
गवगामुद्दिश्य कुंभकर्णस्य वचनम्॰ असौ खरदूषणादिहंता त्वेन प्रसिद्धो रामो भुवनेषु ततु यत्र कुत्रचित् विक्रमसंबंधिभिः संधिविग्रहादि
भिस्तत्सम्मुखे वा धैर्यादिति गुणैर्न तु दोषैः परां उत्कृष्टां प्रसिद्धिं प्राप्तः यदि परमिस खं ओ निपातोऽवधारणार्थः तं रामं देवो भवान्यद्दिष्ट
ं केवलं अस्माकं सर्वेषां भाग्यस्य विपर्ययात् दुर्भाग्यत्वेन परिणामात न जानाति॰ न तु भाग्याभावात्॰ तस्मिन्न हि सति सफलाभावमा
त्रं न त्वसफलं दुर्भाग्यात्त्वसफलमिति विपर्ययपदन्यासः॰ तं देवो जानात्येव यदि न। जानाति तदा परं केवलं भाग्यविपर्ययादिति वार्थः॰
यदि पुनरिति पाठेऽयमेवार्थः प्रसिद्ध नुभूतं विक्रमगुणोदाहरणमाह वंदीवेति॰ एष वायुः मरुत् वंदी वैतालिक इव सामभिः स्वरैः षड्जादि
र्यस्य यशांसि गायति सुग्रीवस्याग्रे॰ कीदृशः एकवाणाहतो तन्निर्भिन्नश्रेणीभूतानां विशालानां विस्तृतानां तालवृक्षाणां विवरैः रंध्रैः रुद्धः गौणोऽप्र
काशितास्तैस्तथाभूतैः एकबाणस्याहतिर्यत्रैवं भूता इति तालविशेषणमिति केचित्॰ एकबाणाहतेति समस्तपाठः॰ एष सा सुग्रीवप्रस
यायविसंष्ठुलाः सप्ततालाः एकबाणेन भिन्ना इत्यस्याख्यानम् १७ तरुणिमन्ति इयं चकितस्य भीतस्य हरिणस्येव चले चंचले नयने यस्या

रम॰
४७

स्तयामूनानायिकासकलानांललनानांस्त्रीणांमौलिमधिवसतिमौलौतिष्ठतीत्यर्थः उपान्वध्याङ्वसइत्याधारस्यकर्मसंज्ञा·कस्मिन्नस
ति·तरुणिमनितारुण्येकलामुपचयंकलयसिआश्रयतिसतितयामुवोरयेडिण्डिमःतेऽनुमदनधनुःमदनधनुषःगुरुभूतस्यसमीपे
पठतिसतित्वयात्रकौशलं·शिक्षितमिति·केचित्तुकलाचातुरी·कलयतिप्रकाशयतिसतीत्यर्थःपठतीत्यत्रापिकलामित्यनुषंगइत्या
हुः अत्ररमनिचामहत्त्वसर्वस्यनवत्वंपूर्वपदार्थप्रधानाव्ययीभावेनचधनुषोगुणान्तांप्रकाशयताततोप्यधिकंजगद्वशीकारकौशलंभू
लतायस्यप्रसाय्यते·मौलिमितिकर्मतयाव्याप्तिसत्त्वेनह्यणसौहर्यातिशयइतिज्ञेयं १८ खगोति स्वगायघुणिकादेवरजाययासुभग
किमपितेभणिता रोदितिगृहपश्चाद्भागवलभीगृहेऽनुनीयतांवराकीतिसं·देवानुरक्तामुपनायिकामुत्सवागतांतस्याकाहह्नाम
नुनेतुंदेवरंप्रतिकस्याश्चि दुक्तिरियं·पश्चोहरशाद्योगृहपश्चाद्भागेदेशी·प्रतिवेशवाचीस्यके·हेदेवरसुभगस्वगणोत्सवेप्राघुणिकाअस्मा
गताकाचिन्नेत्तवजाययापत्न्याकिमपित्वंवाच्यंभणिताउक्तासतीगृहस्यपश्चाद्भागेयहूलभीगृहंउपरिगृहंनचरोदितिअतएवव
राकीदीनाअनुनीयतांसमाधीयतामित्यर्थः १९ स्निग्धेति विभागेयहूलभीगृहंउपरिगृहंनचरोदितिअतएववराकीदीनाअनुनीयतां

समाधीयतामित्यर्थः ॥ २२ ॥ स्निग्धेति विरहिणो रामस्येयमुक्तिः स्निग्धाश्च स्यामाश्च स्यामला या कांतिस्तया लिप्तं संपृक्तं वियदाकाशं यैस्तथा वे
ल्लं सोविलासेन खेलं सोवलाकाबकपंक्तयो येषु तथाभूता घना मेघा एवं घना निबिडाः कामं यथेष्टं संतु । तथापि शीकरिणो बुकरणशालि
नो वाताः शीकरिणः इति निस्ययोगे । ते न मां घ्नन्तः एवं पयोदा मेघाः सुहृत्त्वे काचिदुपकारजनकाये यांते तथाभूता के का पदं सान्निध्यात् मयू
रास्तेषां आनंदेन केकावाण्य अत एव कलाश्च अक्षम मधुराः आनंदेन कंठजा याता कामं संतु दृढमतिशयितं कठोरहृदयाहं राम ४ स खलु दुः
खा क्षमा कथं भवष्यति जीविष्यति तस्याः जीवनं न संभाव्यत इत्यर्थः हहा हेति त्रयो निपाताः खेदातिशये । भावनोपनीतां सीतां संबोध्याह देवी
ति । धीरा भव धैर्यं कुर्वित्यर्थः अत एव देवीति संबोधनं । देवत्वेन धैर्यस्योचितत्वात् । यन्नु सीतामरणासंभाव्य पृथिवीमत्याह हे सर्वंसहे वसुधे दे
वि धीरा भव दुहितृशोकेन त्वं मा विदीर्णा भूरित्यर्थो मदीयस्तु काप्यूर्वीकार्थे अज्ञानकृतत्वाभिधानं कस्य वितत त्काव्य सहृदया ॥ न भिन्नतया
जल्पितमिति सहृदयेरुपेक्षणीयम् । अत्र द्रव्यद्रव्यसंयोगस्य लेपस्य हितकारित्वस्य च सुहृत्त्वस्य कांतिमेघयोर्वाताद्युकार्थलक्षणा । लेप
सुहृत्त्वयोः सर्वथान्वयाननुप्रवेशात् संगतिस्फुततं । लस्मातिशयोक्तयोगयोतयोस्त्रिरूपसंकराभावासंसृष्टिः रामपदेन च सर्वसहत्वानुपयुक्ता

र्थंयतयोक्तार्थसंक्रमितवाचेनपीडासहस्रसंपातेपिप्राणधारणादात्मनिन्मकारोव्यज्यते॰ तत्र च घनकेकाचिरस्यापिस्वयोर्लिप्तसुहृत्सद
ंगपयोरनुग्राहकत्वंव्यक्तमेव॰ एवमेकेनरामपदेनदुःखभाजनत्वलक्षणायाराज्यत्यागवनवासजटावल्कलधारणस्त्रीवियोगादिपात्रत
यातदतिशयव्यक्तिस्तद्द्वाराचसीतांविनापिजीविष्यामीतिशोकावेगनिर्वेदाद्यभिव्यक्तिमुखेनविप्रलंभपरिपोषइतिलक्षणामूलातिश
यध्वनिरसध्वन्योः संकरइतिदिक्॥ ॥इतिश्रीमत्तत्सदुपाख्यश्रीरामभट्टात्मजवैद्यनाथोन्नीतायामुदाहरणचंद्रिकायांचतुर्थउल्लासः
॥ ॥यस्येति॰ बृहन्नलादशायांस्वाभ्युदयायकिमितिनचेष्टसइतिकेनापिपृष्टस्यार्जुनस्येयमुक्तिः॰ अकृतदावैरिणाकृतातिरस्कृतिर्यस्यतथा
भूतो — यस्यममनृशंसानामितिशेषः तमयास्त्वायोव्यधोवेधस्तस्यव्यतिकरेणसंबंधेनकर्णौयुनक्तिसंबध्नातिशरणागतस्यतस्यलोह
शलाकयाकर्णवेधोहेशाचारइतिस्वयमेवशरणागतत्वसूचनायतथाकरोतीत्यर्थः सएषऐश्वर्यभ्रष्टोहंकांच्यागुणेनप्रकर्षेणायहृष्यन्नंतस्य
जनंपात्रमस्मितत्रनियुक्तइतियावत्॰ अतःसंप्रतिअधुनानतुसर्वंजीवन्नमवामिश्लाघ्यजीवनइत्यर्थः किमावहामिकरोमीत्यर्थः॰ अथवाअस्मत्
हृत्कृततिरस्कृतिस्तद्धार्जीतमस्त्वीव्यधव्यतिकरेणकर्णौयुनक्तिकर्णयोस्ताहृत्रादुःखमुत्सादयतीत्यर्थः॥ असौसहमर्थेवाकांचीगुणग्रथन

उद्दा·
४९
५१

माजनंमएवोहमिसाधन्वयइति २१ उन्निद्रेति· नायकेनसहकृतांरतिश्रमालसतयानाकलितप्रबोधसमयांसखीप्रतितत्सचनायसख्या
इयमुक्तिः॰ मधुपाभ्रमरागृहहंसवधिनीपुदीर्घिकास्ववापीषुमंजुमनोहरंयथास्यात्तथागायंतिएतद्रवेर्विंवंचकान्तिदीप्यतेवेसन्वयः तथा
वस्त्यैर्हृदयप्रतीक्षामप्यनाज्ञेयमितिभावः गृहेसनेनातिनिकटस्यतयासकलगृहजनवेघतयाः नोचितसमकाशनं· कीदृशाभ्र
मराः उन्निद्रंविकसितंकोकनदंरक्तोत्पलंतस्यरेणुनापरागेणापिशंगितानिद्राप्ररक्तयोर्मि

१६००

र तीब प्र सा क स्यपत्राणि